# A Critical Edition of *Kāśikā* ad *Ślokavārttika apoha* vv. 95–176

Kei KATAOKA

## 1. Manuscripts

The following edition is the continuation of Kataoka 2014 and 2015 that covers Sucarita's *Kāśikā* ad *Ślokavārttika apoha* vv. 95–176. In preparing the present edition four manuscripts are consulted as before.

- $A_1$ — A manuscript preserved in the Adyar Library, Chennai, No. 38.G.5–5, 63359, TR 66–5. Paper. Devanāgarī. pp. 2727.9–2800.4. (TR 66–7, a manuscript of the same series, is designated by Shida as $T_A$.)
- $G_1$ — A manuscript preserved in the Government Oriental Manuscript Library (GOML), Chennai, R. 3778, S.R. 2126. Paper. Devanāgarī. pp. 442.6–475.17. (Designated as $T_G$ by Shida)
- $K_1$ — A manuscript preserved in the Oriental Research Institute & Manuscript Library (ORI), University of Kerala, C.O.L. No. 1333. Palm Leaf. Malayalam script. ff. 35r11–43r9. (Designated as $K_1$ by Shida)
- $S_1$ — A manuscript preserved in the Sarasvatī Bhavan Library, Varanasi, No. 29032. Paper. Devanāgarī. ff. 401v5–413r7. (Designated as S by Shida)

See Ōmae 1998, Shida 2013, and Kataoka 2014 for further information of these

manuscripts.


## Acknowledgments

I thank Kunio Harikai, Futoshi Ōmae and Taisei Shida for their help in obtaining copies of manuscripts. I am indebted to the following libraries and institutes for giving me permission to consult manuscripts: the Adyar Library, Chennai; the Government Oriental Manuscript Library, Chennai; the Oriental Research Institute & Manuscript Library, University of Kerala; the Sarasvatī Bhavan Library, Varanasi. The complex typesetting of the present edition is made possible thanks to the EDMAC macros developed by John Lavagnino and Dominik Wujastyk.


## Bibliography

See the bibliography in Kataoka 2014 and 2015 for other references.

### Primary sources


*Pramāṇasamuccaya*

See Pind 2015.

*Brahmasiddhi*

*Brahmasiddhi by Ācārya Maṇḍanamiśra with Commentary by Śaṅkhapāṇi*. Ed. S. Kuppuswami Sastri. Madras: The Superintendent, Government Press, 1937.

*Mahābhārata*

*The Mahābhārata*. Ed. V.S. Sukthankar et al. Poona: Bhandarkar Oriental Research Institute, 1927-59.






### Secondary literature


Kataoka, Kei（片岡　啓）

2014 "Sucaritamiśra's Critique of Apoha: A Critical Edition of *Kāśikā* ad *Ślokavārttika apoha* v.1." *The Memoirs of Institute for Advanced Studies on Asia*, 165, 362(1)-289(74).

2015 "A Critical Edition of *Kāśikā* ad *Ślokavārttika apoha* vv. 2-94." *The Memoirs of Institute for Advanced Studies on Asia*, 167, 466(39)-400(105).

Pind, Ole Hoten

2015 *Dignāga's Philosophy of Language: Pramāṇasamuccayavṛtti V on Anyāpoha*. 2 parts. Verlag der Österreichischen Akademie der Wissenschaften.

# काशिका

## सुचरितमिश्रकृता।

### अपोहवादः।

95

एवं तावन्नाभावयोराधाराधेयसंबन्धः। असाधारणं चापोहाधारतया न शब्दादवगम्यते। नापि वस्त्ववस्तुनोः संबन्धो युज्यत इत्युक्तम्। अपोहविशिष्टवाच्यता च निराकृता।

अपोह्यमिदानीमभिसंधास्यामः — व्यक्तिः सामान्यं वापोह्यमिति। न तावद्व्यक्तीनामपोह्यता संभवति, तासामशब्दवाच्यत्वात्। न हि ता अगौरित्यादिशब्देनाभिधातुं शक्यन्ते, येन तद्व्यावृत्त्या गौरित्यवसीयते। अतः सामान्यमेवापोह्यमङ्गीकार्यम्। तच्चापोहनक्रियाकर्मभावाद् वस्तुरूपमेवापद्येत, अवस्तुनो ऽपोहासंभवात्। तदेतदाह — यदेति।

96ab

3 इत्युक्तम् ] *Ślokavārttika apoha* 85cd–86.
4 निराकृता ] *Ślokavārttika apoha* 87–91.

2 °धेय° ] $A_1G_1S_1$; °धेयवृत्त्यादि° $K_1$ 3 न ] $A_1G_1S_1$; om. $K_1$ 3 °दवगम्यते ] $A_1G_1K_1$; °द्गम्यते $S_1$ 3 युज्यत ] $A_1G_1S_1$; om. $K_1$ 4 °विशिष्ट° ] $A_1G_1K_1$; °विशेष्य° $S_1$ 5 °भिसंधास्यामः ] $A_1G_1$; °नुसंधास्यामः $K_1S_1$ 6 न ] $S_1$; तन्न $A_1G_1K_1$ 6 °क्तीनाम° ] $A_1G_1S_1$; °क्तीनामप्य° $K_1$ 6 तासाम° ] $A_1G_1K_1$; अ° $S_1$ 7 अगौरि° ] $A_1G_1K_1$; अगोरि° $S_1$ 7 °त्यादि° ] $A_1G_1K_1$; °त्यादिना $S_1$ 7 °वृत्त्या ] $A_1G_1K_1$; °वृत्ता $S_1$ 8 गौरित्य° ] $A_1G_1$; गौर° $K_1S_1$ 8 °वापोह्य° ] $A_1G_1S_1$; °वापोह° $K_1$ 8 तच्चा° ] $A_1G_1K_1$; तवा° $S_1$ 9 °मेवापद्येत ] $A_1G_1S_1$; °मापद्येत $K_1$ 10 यदेति ] $A_1G_1S_1$; यदा चाशब्दवाच्यत्वान्न व्यक्तीनामपोह्यता तदापोह्येत सामान्यन्तस्यापोहाच्च वस्तुता $K_1$





अवस्तुनो नापोह्यत्वमित्येतदेव दर्शयति — नेति।

96cd

अतः सिद्धम् अपोहान्तरे ऽनश्वापोहाभिमते सामान्यवस्तुन एवापोह्यत्वं न व्यक्तीनाम्, न चाभावात्मनो ऽपोहस्येति। उपसंहरति — व्यक्त इति।

97

एवं तावन्नाभावाभावः संभवतीत्युक्तम्। अपि चायमगोरूपस्याभावस्य यो ऽपरो ऽभावो गोशब्दवाच्यः, स किं तस्मादपोह्याद्भावाद्विलक्षणो वा न वा। वैलक्षण्ये भावरूपत्वापत्तेर्नावस्त्वात्मकं सामान्यम्। इतरथा त्वगौरेव गौरापद्येत। तदेतदाह — अभावस्य चेति।

98

यदि तूच्यते — नाभावाभावो गौः, अश्वाद्यभावरूपस्तु, ते च भावात्मान एवेति।

तन्न, तेषामप्यनश्वापोहरूपत्वेनाभावात्मकत्वात्, तेषां वा वस्त्वात्मकत्वे गव्यपि तथात्वप्रसङ्गात्।

1 नेति ] $A_1G_1S_1$; नापोह्यत्वमपोह्यानामभावाभाववर्जनात् $K_1$ 3 अपोहान्तरे ] $A_1G_1K_1$; अपोहादपोहान्तरे $S_1$ 3 ऽनश्वा° ] $K_1S_1$; नश्वा° $A_1G_1$ 4 °पोह्यत्वं ] $A_1G_1K_1$; °पोहो $S_1$ 4 °त्मनो ऽपोहस्ये° ] $A_1G_1K_1$; °त्मनो पोहःसे° $S_1$ 5 व्यक्त इति ] $A_1G_1S_1^{pc}$; व्यक्तो पोहान्तरे पोहस्तस्मात्सामान्यवस्तुनः $K_1$; व्यक्तय इति $S_1^{ac}$ 9 °दपोह्यादभावाद्वि° ] $A_1G_1K_1$; °दपोह्याद्वि° $S_1$ 9 वा न वा ] $A_1G_1$; न वा $K_1S_1$ 9 °त्वापत्तेर्नाव° ] $A_1G_1$; °तापत्तेर्व° $K_1S_1$ 10 इतरथा ] $A_1G_1K_1$; अन्यथा $S_1$ 10 त्वगौरेव ] $A_1G_1K_1$; ऽगोरेव $S_1$ 10 गौरा° ] $A_1G_1K_1$; गौरित्या° $S_1$ 11 अभावस्य चेति ] $A_1G_1$; अभावस्य च यो भावस्स चेत्तस्माद्विलक्षणः भाव एव भवेन्नो चेत् गौरगौस्ते प्रसज्यते $K_1$; अभावस्येति $S_1$ 13 नाभावाभावो ] $A_1G_1K_1$; न हि भावाभावौ $S_1$ 13 °द्यभाव° ] $A_1G_1K_1$; °द्यपोह° $S_1$ 15 °नश्वापोह° ] $A_1G_1S_1$; °नश्वाद्यभाव° $K_1$ 15 °पत्वेना° ] $A_1G_1K_1$; °पत्वे $S_1$ 15 वा ] $A_1G_1K_1$; चा° $S_1$

अस्तु वा गवादिशब्देषु कथंचिद्वस्तुनो ऽपोह्यत्वम्। सच्छब्दार्थस्त्वसदपोहेनैव प्रत्येतव्यः, प्रकारान्तराभावात्। तत्रैष प्रसङ्गो दुर्वारः—असतस्तदपोहो विलक्षणो वा न वा। वैलक्षण्ये भावरूपः सच्छब्दार्थः, अवैलक्षण्ये सदसतोरविवेक इत्यभिप्रायेणाह—यद्यपीति।

99ab

यदि त्वगवादाविवाश्वादिरूपेणासत्यपि केनचिदात्मना भावत्वमिष्यते, ततः सदसद्विवेकाभावान् महान् क्लेशो भवेदित्याह—तत्रेति।

99c

यदि त्वसन्नाम न किंचिदिष्यते, एवं सत्यपोह्याभावात्सच्छब्दार्थः सत्ता न सिध्यतीत्याह—तदसिद्धाविति।

99d

न केवलं सत्ता न सिध्यति। असत्तापि सत्प्रतिषेधात्मासति सच्छब्दार्थे न स्यादेव। तत्रात्मेश्वरप्रधानादयो न सन्तीति नास्तिकानामवचनीयमापन्नमित्यभिप्रायेणाह—न चेति।

100abc

---

**1** सच्छब्दा° ] $A_1G_1K_1$; सशब्दा° $S_1^{ac}$; सत्शब्दा° $S_1^{pc}$ **2** °पोहेनैव ] $A_1G_1S_1$; °पोहेन $K_1$ **2** °राभावात् ] $A_1G_1$; °रासंभवात् $K_1S_1$ **2** तत्रैष ] $A_1G_1S_1$; अत्रैष $K_1$ **3** °दपोहो ] $K_1S_1$; °दापोहो $A_1G_1$ **3** वा न वा ] $A_1G_1$; न वा $K_1S_1$ **4** सदसतोर° ] $K_1S_1^{pc}$; सदसतोप्य° $A_1G_1$; सदसतोर् $S_1^{ac}$ **5** यद्यपीति ] $A_1G_1S_1$; यद्यप्यन्येषु शब्देषु वस्तुन स्यादपोह्यता सच्छब्दस्य त्वभावाख्यान्नापोह्यम्भिन्नमिष्यते $K_1$ **7** °णासत्यपि ] $A_1G_1K_1$; °णै° $S_1$ **8** तत्रेति ] $A_1G_1$; तत्रासतो पि भावत्वमिति क्लेशो महान् भवेत् $K_1$; तेनेति $S_1$ **10** किंचिदि° ] $A_1G_1S_1$; किञ्चित्तत्वान्तरमि° $K_1$ **11** तदसिद्धाविति ] $A_1G_1S_1$; तदसिद्धौ न सत्तास्ति $K_1$ **13** सिध्यति। अ° ] $A_1G_1K_1S_1^{pc}$; सिध्यात्य° $S_1^{ac}$ **14** °त्मेश्वर° ] $K_1$; °त्मेश्वरेच्छा° $A_1G_1$; °त्मेश्वरा° $S_1$ **14** सन्तीति ] $A_1G_1K_1$; संभवन्तीति $S_1$ **15** °मवचनीयमापन्नमि° ] $A_1G_1$; °मवचनीयतामापन्नमि° $K_1$; °मनिर्वचनीयमापतितमि° $S_1$ **15** न चेति ] $A_1G_1S_1$; न चासत्ता प्रसिध्यति $K_1$





अत्र बौद्धा वदन्ति। किमिदं वास्तवमिवापोहापोह्यभेदं व्यवहारभेदं मन्वानैर्दूषणमभिधीयते। वासनामात्रनिर्मितः खल्वयमपोहानामपोह्यानां च भेदः। अस्ति ह्यनादिकालप्रवृत्ता शब्दार्थेष्वेव भेदवासना। सोद्भूता सती तेषां भेदमिवादर्शयति। अत एव पर्यायत्वादिप्रसङ्गपरिहारो ऽपि, वासनैव शब्दार्थानामवस्तुभूतानामपि भेदमापादयति यतः। यदा हि व्यावृत्तस्वभावेषु स्वलक्षणेषु परस्परमसंकीर्णान्यनुगतानि सामान्यानि न प्रमाणबलोपपन्नानि, तदा कथं नामान्यथा शब्दार्थानां भेदमभिधास्यामो ऽन्यतो वासनाभेदात्। अत एवासद्रूपाविशेषे ऽप्यपोह्यापोहभेदप्रत्ययः। सो ऽपि हि वासनामात्रकारित एव, न वस्तुलक्षणः। वास्तववस्तु स्वलक्षणानामेव भेदः। स च सजातीयविजातीयानामविशिष्ट एवेति न शब्दार्थव्यूहभेदमापादयितुमलम्।

यत्तूक्तम् "बोधस्तु ज्ञातुर्वस्त्ववलम्बते" इति, तत्रापि वासनैव निबन्धनम्। सैव ह्यसद्रूपानप्यपोहान् वस्तुरूपानिव दर्शयति,

---

**13** *Ślokavārttika apoha* 92cd.

---

**1** °वापोहापोह्य° ] $S_1$; °वापोह्यापोह्य° $A_1G_1$; °वास्यापोह्यापोह° $K_1$ **1** °भेदं ] $A_1G_1K_1$; °भेद° $S_1$ **1** व्यवहारभेदं ] $A_1G_1$; °व्यवहारं $K_1S_1$ **2** वासना° ] $A_1G_1K_1$; वासनाभेद° $S_1$ **2** °निर्मितः ] $A_1G_1$; °निमित्तः $K_1S_1$ **3** °पोहानामपोह्यानां ] $A_1G_1$; °पोह्यानामपोहानाञ् $K_1$; °पोह्यानां $S_1$ **3** शब्दार्थेष्वेव ] $A_1G_1$; ऽसद्रूपेष्वेव $K_1$; शब्दार्थेषु $S_1$ **3** भेदवासना ] $A_1G_1S_1$; भेदावसाना $K_1$ **4** °दमिवा° ] $A_1G_1$; °दमिव $K_1S_1$ **4** °यत्वादि° ] $A_1G_1K_1$; °यत्वाति° $S_1$ **6** °भावेषु ] $A_1G_1K_1$; °भावे $S_1$ **6** स्वलक्षणेषु ] $A_1G_1K_1$; स्वलक्षणे $S_1$ **6** °कीर्णान्य° ] $A_1G_1K_1$; °कीर्णम° $S_1$ **7** °बलो° ] $A_1G_1S_1$; °बलेनो° $K_1$ **9** ऽप्यपोह्या° ] $A_1G_1K_1$; प्रयोज्या° $S_1$ **9** हि ] $A_1G_1S_1$; om. $K_1$ **9** वासना° ] $A_1G_1S_1$; वासन° $K_1$ **10** वस्तुलक्षणः ] $A_1G_1K_1$; वस्त्वाश्रयः $S_1$ **10** वास्तववस्तु ] $A_1G_1K_1$; वस्तुतस्तु $S_1$ **11** °तीयानामविशिष्ट ] $S_1$; °तीयानां विशिष्ट $A_1G_1$; °तीयायामविशिष्ट $K_1$ **11** न ] $A_1G_1$; नायं $K_1$; नीलं $S_1$ **12** °तुमलम् ] $A_1G_1$; °तुमलमिति $K_1$; °तुं $S_1$ **13** यत्तूक्तम् ] $A_1G_1K_1$; यदप्युक्तं $S_1$ **14** °नप्यपोहान् ] $S_1$; न व्यपोहान् $A_1G_1$; °नप्यपोह्यान् $K_1$ **14** वस्तु° ] $A_1G_1K_1$; सद्° $S_1$

तथैवानादिकालप्रवृत्तेः। अतो यदेव किंचिदिह सिद्धान्ते दुर्घटम्, तदेव वासनानुसारेण शक्यसमाधानम्। अत आह—न चापीति कल्प्येतान्तेन।

100d

कथं न वासनानिबन्धनमपोहानामुभयम्। अत आह—न हीति। अयमभिप्रायः। न तावद्वस्त्वात्मकासाधारणजनिता वासनावस्तु-भूतापोहभेदोपपादनाय क्षमते। न च वस्त्वात्मानो ऽपोहा नाम केचित्सन्ति ये भिन्नवासनाजननाय कल्पन्ते। न चानिमित्तैव वास-ना जायत इति सांप्रतम्। ज्ञानजो हि ज्ञानहेतुः संस्कारो वासना नाम। सा कथमनिमित्ता भवेत्। अतो नावस्तुन्यपोहे वासनाभेदस्य निबन्धनमिति।

101

अपि च स्मृतिहेतुः संस्कारो वासना। सा कथमन्यादृशे ऽपोहरूपे ऽर्थे ऽन्यादृशीं वस्त्वाकारबुद्धिं जनयति। अतो वस्त्वसद्रूपबोधे नि-बन्धनमित्यपि नोपपन्नम्। गृहीतविषया हि स्मृतिर्भवति। सद्रूपं च

1 ०वानादि० ] $A_1G_1K_1$; ०वाधुनादि० $S_1$　1 ०काल० ] $A_1G_1S_1$; ++ $K_1$　1 सिद्धान्ते ] $A_1G_1K_1$; सिद्धान्तेषु $S_1$　2 ०धानम् ] $A_1G_1S_1$; ०धानमिति $K_1$　3 न चापीति कल्प्येतान्तेन ] $A_1G_1$; न चापि वासनाभेदात् भेदस्सद्रूपतापि च अपोहानां प्रकल्प्येत $K_1$; न चापीति $S_1$　5 कथं न ] $K_1S_1$; कथं $A_1G_1$　5 ०मपोहानामुभयम् ] $A_1G_1K_1$; ०मुभयमपोहानाम् $S_1$　5 न हीति ] $A_1G_1S_1$; न ह्यवस्तुनि वासना $K_1$　6 ०यः। न तावद्वस्त्वा० ] $A_1G_1$; ०यः न ता++ + $K_1$; ०यो वदवस्त्वा० $S_1^{ac}$; ०यस्तावदवस्त्वा० $S_1^{pc}$　7 ०भूता० ] $A_1G_1$; ०रूपा० $K_1S_1$　7 क्षमते ] $A_1G_1K_1S_1^{pc}$; ममते $S_1^{ac}$　9 ज्ञानजो हि ] $A_1G_1K_1^{pc}$; ज्ञानतो पि $K_1^{ac}$; ज्ञानजो $S_1$　9 संस्कारो ] $A_1G_1K_1$; संस्कारो हि $S_1$　10 नाम। सा ] $A_1G_1$; सा $K_1$; om. $S_1$　10 ०ता भवेत् ] $A_1G_1K_1$; ०त्तोद्भवेत् $S_1$　13 ०दृशे ] $G_1K_1S_1$; ०दृशो $A_1$　14 ऽपोहरूपे ऽर्थे ] $A_1G_1K_1^{pc}S_1$; सार्थे $K_1^{ac}$　14 ०कार० ] $A_1G_1$; ०कारां $K_1S_1$　14 ०बुद्धिं ] $A_1G_1K_1$; बुद्धि $S_1$　14 वस्त्व० ] $A_1G_1$; वासना० $K_1S_1$　14 ०बोधे ] $A_1G_1S_1$; ०बोध० $K_1$





सामान्यमगृहीतमेवेति कथं स्मर्येतेत्यभिप्रायेणाह—स्मृतिमिति।

102ab

एवं तावदर्थापोहभेदो न वासनानिबन्धनः संभवतीत्युक्तम्। शब्दा-पोहभेदो ऽप्येवमेव वासनानिबन्धनो निराकार्य इत्याह—भवद्भि-रिति। शब्दापोहभेदो ऽपि न वासनानिबन्धनः संभवतीति। न चैकरूपमनुगतमन्तरेण शब्दानां संबन्धो गृहीतुं शक्यते। न चैक एव स्थायी शब्दो भवद्भिरिष्यते। न च वैशेषिकादीनामिव गोशब्दत्वादि सामान्यं भवतामस्ति यत्संबन्धग्रहणालम्बनं भवेत्। असाधारण-स्तु प्रागदृष्टः शब्दो न वाचकतया गृहीतुं शक्यते। अतो ऽवश्यं शब्दापोहनिबन्धन एव शाब्दो व्यवहार एषितव्यः।

102cd

तत्र च शब्दापोहभेदो न वासनानिबन्धनः संभवतीत्यभिप्रायेणाह—न हीति।

103ab

न चासाधारणा एव शब्दभेदा एकरूपां वासनां जनयितुमलं येन तन्निबन्धनः शब्दापोहभेदो भवेत्, भिन्नैरेकरूपवासनाजननायोगाद्

1 सामान्यम० ] $A_1G_1K_1$; सामान्यमसन्न० $S_1$　1 स्मर्येतेत्य० ] $A_1G_1K_1$; स्मर्येत इत्य० $S_1$　1 स्मृतिमिति ] $A_1G_1S_1$; स्मृतिम्मुत्का न चाप्यस्याश्शक्तियोगः क्रियान्तरे तस्मान्नान्यादृशे सार्थे करोत्यन्यादृशीमतिम् $K_1$　3 वासना० ] $A_1G_1K_1$; वासनाभेद० $S_1$　5 भवद्भिरिति ] $A_1G_1S_1$; भवद्भिश्शब्दभेदो पि तन्निमित्तो न लभ्यते $K_1$　5 शब्दापोह० ] $A_1G_1$; शब्द० $K_1S_1$　6 ०मनुगत० ] $K_1S_1$; ०मगृहीत० $A_1G_1$　7 स्थायी शब्दो ] $S_1$; शब्दस्थायी $A_1G_1K_1$　7 गोशब्दत्वादि ] $A_1G_1K_1$; गोशब्दादि० $S_1$　9 शब्दो न ] $K_1S_1$; शब्देन $A_1G_1$　9 गृहीतुं शक्यते ] $A_1G_1K_1$; शक्यते गृहीतुं $S_1$　12 च ] $A_1G_1K_1$; om. $S_1$　12 वासना० ] $A_1G_1K_1$; वासनाभेद० $S_1$　13 न हीति ] $A_1G_1S_1$; न ह्यसाधारणश्शब्दो वाचकः प्रागदृष्टितः $K_1$　15 शब्दभेदा ] $A_1G_1S_1$; शब्दरूपा $K_1$　16 तन्निबन्धनः ] $K_1$; तन्निबन्धन० $A_1G_1S_1$　16 ०पोहभेदो ] $A_1G_1$; ०पोहव्यूहभेदो $K_1S_1$　16 ०रेकरूप० ] $A_1G_1K_1$; ०रेकस्वरूप० $S_1$　16 ०जनना० ] $A_1G_1K_1$; ०जनका० $S_1$

इत्याह—भिन्नत्वादिति।

103cd

एकं तु व्यक्तिरूपं सामान्यरूपं वा शब्दवस्तु भवतां नास्त्येव येनैवंरूपा वासना जन्यत इत्याह—न चेति।

104

एवं चासति वासनानिबन्धने शब्दभेदे ऽश्वादिशब्दान्तरापोहात्मनि च गोशब्दादिसामान्ये परिकल्पिते तथैवार्थापोहवच्छब्दापोहात्मनाम् अवस्तुरूपत्वेनाविशेषाच्छब्दभेदो दुर्भण इत्याह—तत्रेति।

105ab

एवं तावद्वाच्यानां वाचकानां चाभेदप्रसञ्जनं कृतम्। अपि च वाच्यवाचकयोरप्यवस्तुत्वेनाभेदादभेद एव परस्परमित्याह—वाचकानामिति।

105cd

---

1 भिन्नत्वादिति … इत्याह ] $A_1G_1S_1$; om. $K_1^{ac}$; भिन्नत्वाच्चापि नैवैका वासना तैः प्रकल्प्यते एकन्तु व्यक्तिरूपां सामान्यरूपं वा शब्दवस्तु भवतान्नास्त्येव येनैकरूपवासना जन्यते इत्याह $K_1^{pc}$(eyeskip) 3 व्यक्ति° ] $A_1G_1K_1^{pc}$; शक्ति° $S_1$ 3 सामान्यरूपं° ] $K_1^{pc}$; सामान्यं रूपं $A_1G_1$; om. $S_1$ 4 येनैवंरूपा ] $A_1G_1$; येनैकरूप° $K_1^{pc}$; येनैकरूपा $S_1$ 4 न चेति ] $A_1G_1S_1$; न चास्ति शब्दवस्त्वेकं वासनां यत् करिष्यति $K_1$ 6 एवं चासति ] $A_1G_1K_1$; एवं सति $S_1$ 6 वासना° ] $A_1G_1K_1$; वासनाभेद° $S_1$ 7 तथैवार्था° ] $A_1G_1K_1^{pc}S_1$; तथैवा वस्तुरूपत्वाच्छब्दभेदो न लभ्यते $K_1^{ac}$ 8 °पोहात्मनाम् ] $A_1G_1$; °पोहानाम् $K_1S_1$ 8 °त्वेना° ] $K_1S_1$; °त्वेन- $A_1G_1$ 8 तत्रेति ] $A_1G_1S_1$; तत्र शब्दान्तरापोहे सामान्ये परिकल्पिते तथैवावस्तुरूपत्वाच्छब्दभेदो न लभ्यते तथैवार्थापोहवच्छब्दापोहानामवस्तुरूपत्वेनाविशेषाच्छब्दभेदो दुर्भण इत्याह तत्र शब्दान्तरापोहे सामान्ये परिकल्पिते तथैवावस्तुरूपत्वाच्छब्दभेदो न लभ्यते $K_1$ 11 °कयोरप्य° ] $A_1G_1K_1$; °कयोर° $S_1$ 11 °वस्तु° ] $A_1G_1K_1$; °वस्तुरूप° $S_1$ 11 °भेदादभेद ] $A_1G_1$; °भेद $K_1S_1$ 12 वाचकानामिति ] $A_1G_1$; वाचका न कथम् यथा चैवं वाच्यवाचकयोर्मिथः $K_1^{ac}$; वाचकानाम् यथा चैवं वाच्यवाचकयोर्मिथः $K_1^{pc}$; वाच्यानामिति $S_1$





अपोह्यभेदनिबन्धनस्याश्वार्थापोहानामिव शब्दापोहानामपि भेदो निराकार्य इत्याह—न चेति।

106ab

अपि चानेन शब्दादर्थं प्रतिपद्यमानेन प्रथममपोहात्मा शब्दो गृहीतव्यः, इतरथानुच्चरितादपि शब्दादर्थप्रतीतिप्रसङ्गात्। न चास्य ग्रहणे किंचित्प्रमाणमिति वक्ष्यमाणाभिप्रायेणाह—नागृहीत इति।

106c

प्रमाणाभावमेव दर्शयति—प्रत्यक्षमिति। कल्पनापोढं हि प्रत्यक्षं नास्य सामान्यविषयता भवद्भिरिष्यते। अतस्तत्तावच्छब्दापोहग्रहणे ऽशक्तमेवेति।

106d–107a

अपोहप्रमाणाभिमतं तु लिङ्गं शब्दो वा न शब्दापोहावधारणावसरे किंचिदस्ति यतस्तस्य ग्रहणं स्यादित्याह—न चेति।

107bcd

यदि तु तत्तद्ग्रहणार्थमपरं किमपि लिङ्गं गोशब्दो वा कल्प्येत, ततस्तस्याप्यपोहरूपत्वाद् अपरापरशब्दलिङ्गान्विच्छायाम् असति मू-

---

1 °भेद° ] $A_1K_1S_1$; °बोध° $G_1$ 1 °नश्वा° ] $A_1G_1K_1$; °नस्त्व° $S_1$ 1 °हानामपि ] $A_1G_1K_1$; °हानां $S_1$ 2 न चेति ] $A_1G_1S_1$; न चाप्यपोह्यभेदेन भेदो स्तीत्युपपादितम् $K_1$ 4 शब्दादर्थं प्रतिपद्यमानेन ] $K_1$; शब्दार्थं प्रतीयमानेन $A_1G_1$; om. $S_1$ 5 °नुच्चरिता° ] $A_1G_1S_1$; °नुच्चारिता° $K_1$ 6 चास्य ग्रहणे ] $A_1G_1K_1$; चासतद्ग्रहणे $S_1$ 6 किंचित्प्रमाणमिति ] $A_1G_1K_1$; प्रमाणं समस्तीति $S_1$ 6 °प्रायेणाह ] $A_1G_1S_1$; °प्रायेयेणाह $K_1$ 6 नागृहीत इति ] $A_1G_1S_1$; नागृहीतश्च गमकश्शब्दापोहः कथञ्चन $K_1$ 8 प्रत्यक्षमिति ] $A_1G_1S_1$; प्रत्यक्षन्न च तच्छक्तं $K_1$ 9 नास्य ] $A_1G_1S_1$; न चास्य $K_1$ 10 °ग्रहणे ऽशक्त° ] $A_1G_1S_1$; °ग्रहणम् अशक्त° $K_1$ 12 °हावधारणा° ] $A_1G_1S_1$; °हग्रहणा° $K_1$ 13 न चेति ] $A_1G_1S_1$; न च स्तो लिंगवाचकौ येन स्यात् ग्रहणन्तस्य $K_1$ 15 तत्तद्ग्र° ] $A_1G_1$; तद्ग्र° $K_1S_1$ 15 लिङ्गं गोशब्दो ] $A_1G_1$; शब्दो लिंगं $K_1$; लिंगं शब्दो $S_1$ 15 कल्प्येत ] $A_1G_1K_1$; कल्प्यते $S_1$ 16 ततस्त° ] $A_1G_1K_1$; ऽतस्त° $S_1$ 16 °न्विच्छायाम् ] $A_1G_1K_1$; °न्वीक्षायाम् $S_1$

लभूते प्रत्यक्षे ऽव्यवस्था भवेदित्याह—लिङ्गादीनामिति। व्यवस्था "न" इत्यनेन प्रकारेण वाच्येत्यर्थः।

108

एवमर्थशब्दापोहयोर्निराकृतं वाच्यवाचकत्वमिदानीं प्रयोगेण दर्शयति—नेति। शब्दार्थापोहौ गम्यगमकौ न भवतः, भवत्पक्षे ऽवस्तुत्वाल्लोक इव खपुष्पशशविषाणे। न हि तयोरन्योन्यं गम्यगमकत्वमस्ति। भवत्पक्ष इत्यस्मत्पक्षे वस्तुरूपतां दर्शयितुमिति।

109abc

नन्वसतोरपि गम्यगमकता दृष्टा यथा वृष्टिमेघाभावयोः। मेघाभावेनेह वृष्ट्यभावो ऽनुमीयते। अतो ऽवस्तुनोरपि गम्यगमकत्वदर्शनादनैकान्तिको हेतुरिति।

मैवम्, अस्मत्पक्षे तत्रापि वस्तुभावात्। न हि नो बौद्धानामिव निरुपाख्यो निःस्वभावो ऽभावः। वस्त्वेव हि वस्त्वन्तरविविक्तमभावः। ततश्च युक्तमेवास्मत्पक्षे मेघाभावेन वृष्ट्यभावानुमानमित्याशङ्क्या

---

1 ऽव्यवस्था ] $A_1G_1K_1$; प्यवस्था $S_1$　1 लिङ्गादीनामिति ] $A_1G_1S_1$; लिंगादीनाञ्च कल्पने न व्यवस्थेति वाच्यैवं विना प्रत्यक्षमूलत $K_1$　4 एवमर्थ° ] $A_1G_1K_1S_1^{pc}$; एवं $S_1^{ac}$　4 °तं वाच्यवाचकत्वमिदानीं ] $A_1G_1S_1$; °तमिदानीम् वाच्यवाचकत्वम् $K_1$　4 प्रयोगेण ] $A_1G_1$; प्रयोगेन $K_1S_1$　5 नेति ] $A_1G_1S_1$; न गम्यगमकत्वं स्यादवस्तुत्वादपोह्ययोः भवत्पक्षे यथा लोके खपुष्पशशशृंगयोः $K_1$　5 गम्यगमकौ न भवतः ] $A_1G_1$; न गम्यगमकौ भवतः $K_1$; गम्यगमकौ $S_1$　6 °न्योन्यं ] $A_1G_1K_1$; °न्योन्य° $S_1$　7 इत्यस्मत्पक्षे ] $A_1G_1$; इति स्वपक्षे $K_1S_1$　7 दर्शयितुमिति ] $A_1G_1K_1$; दर्शयितुं $S_1$　10 °नेह ] $A_1G_1$; °न हि $K_1S_1$　10 वृष्ट्यभावो ] $A_1G_1S_1$; वृष्ट्याभावो $K_1$　10 ऽवस्तुनोरपि ] $K_1S_1$; ऽवस्तुनो ऽपि $A_1G_1$　11 हेतुरिति ] $A_1G_1K_1$; हेतुः $S_1$　12 तत्रापि ] $A_1G_1K_1$; त्रापि $S_1$　13 निरुपा° ] $K_1S_1$; निरूपा° $A_1G_1$　13 ऽभावः। वस्त्वेव हि ] $A_1G_1S_1$; भाववस्त्वेव $K_1$　13 °विविक्तम° ] $K_1S_1$; °विविक्तो ऽ° $A_1G_1$　14 ततश्च ] $A_1G_1S_1$; अतश्च $K_1$　14 °स्मत्पक्षे ] $A_1G_1K_1$; °स्मन्मते $S_1$　14 °भावेन ] $A_1G_1K_1$; °भावाद् $S_1$　14 वृष्ट्य° ] $A_1G_1S_1$; वृष्ट्या° $K_1$





सहाह—वृष्टीति।

109d

यदि तु स्वपक्षाभिप्रायेणात्रैवावस्तुभावो ऽभिधीयते, ततो गम्यगमकत्वमप्यदः कुतो भवताम्। तावपि हि तदा साध्यसमावेवेत्यभिप्रायेणाह—भवत्पक्ष इति।

110

अर्थापोहोक्तमेव दूषणान्तरं शब्दापोहे ऽपि दर्शयति—विधिरूप इति। शब्दान्तरापोहेन हि शब्दान्तरे गम्यमाने व्यतिरेको दर्शयितव्यः। यथा तावद् गोशब्द एवागोशब्दो न भवतीति गोशब्द इति। न चायं गोशब्दव्यतिरेको ऽगोशब्द इत्येवमात्मा विधिरूपं गोशब्दमन्तरेण सिध्यति। यथोक्तम् अर्थापोहे "गव्यसिद्धे त्वगौर्नास्ति" इति। एवं चासति व्यतिरेके कस्यापोहेन गोशब्दो ऽवसीयते। तदिहापि गोशब्दसिद्धावगोशब्दसिद्धिः, अगोशब्दसिद्धौ गोशब्दसिद्धिरितीतरेतराश्रयं भवेत्। अतो ऽवश्यं विधिरूप एव गोशब्दशब्दार्थो

---

11 *Ślokavārttika apoha* 85a.

---

1 वृष्टीति ] $A_1G_1S_1$; वृष्टिमेघासतोर्दृष्ट्या यद्यनैकान्तिकं भवेत् वस्त्वेवात्रापि मत्पक्षे $K_1$　3 °णात्रैवावस्तुभावो ] $A_1G_1$; °णात्राप्यवस्त्वाभावो $K_1$; °णात्र वस्त्वभावो $S_1$　4 °प्यदः ] $S_1$; °पि अतः $A_1G_1K_1$　4 तावपि हि तदा ] $A_1G_1$; तदा तावपि हि $K_1$; तावपि तदा $S_1$　4 साध्यसमावे° ] $A_1G_1K_1$; साध्यसमानावे° $S_1$　5 भवत्पक्ष इति ] $A_1G_1S_1$; भवत्पक्षे त्वदः कुतः $K_1$　7 °तरं ] $A_1G_1K_1$; °तरमिदानीं $S_1$　7 ऽपि दर्शयति ] $K_1S_1$; om. $A_1G_1$　8 विधिरूप इति ] $S_1$; रूप इति $A_1G_1$; विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते न भवेद्व्यतिरेको पि तस्य तत्पूर्वको ह्यसौ $K_1$　8 शब्दान्तरे ] $A_1G_1$; शब्दान्तरेव° $K_1$; शब्दान्तरे ऽवश्य° $S_1$　9 तावद् ] $A_1G_1K_1$; भावाद् $S_1$　10 इत्येवमात्मा ] $K_1S_1$; इत्येवमात्रात्मा $A_1G_1$　10 विधिरूपं ] $A_1G_1K_1$; विधिरूप° $S_1$　11 गव्य° ] $A_1G_1K_1$; शब्द° $S_1$　11 त्वगौ° ] $A_1G_1S_1$; प्यगौ° $K_1$　12 चासति ] $A_1G_1K_1$; गमयति $S_1$　12 व्यतिरेके ] $A_1G_1S_1$; व्यतिरेकै $K_1$　12 ऽवसीयते ] $A_1G_1$; वसीयेत $K_1$; गम्यते $S_1$　13 °सिद्धौ ] $A_1G_1K_1$; °सिद्धौ च $S_1$　14 °श्रयं ] $A_1G_1S_1$; °श्रयः $K_1$　14 अतो ] $A_1G_1K_1$; ततो $S_1$　14 गोशब्दशब्दार्थो ] $A_1G_1K_1$; गोशब्दो $S_1$

ऽभ्युपेतव्य इति भावः।

111

अपि चागोशब्दो न भवतीति येयं निषेधद्वययोगादसतो ऽगोशब्दस्याभावताभावसंबन्धो ऽसावपि सवस्तुक एव युक्तः, न पुनस्तुच्छे भावान्तरोपष्टम्भरहिते, तथाविधाभावबुद्ध्यसंभवात्। न चासाधारण एव गोशब्दापोहालम्बनं संभवति, सामान्यरूपानुपपत्तेः। यथोक्तमर्थापोहे "तथा च शाबलेयादिः" इति। तदेतदाह—निषेधेति।

112

अत्र चोदयति—नन्विति। यो ऽयमवस्तुत्वेनापोहानामभेदात्पर्यायत्वादिदोष उक्तः, स न भविष्यति। ययैव हि युक्त्या मत्पक्षे ऽवस्तुत्वेनापोहो ऽपोहान्तरान्न भिद्यते, तयैव वस्तुनो ऽपि तस्य भेदो नास्त्येव। वस्तूनि च भिन्नान्येवेति न पूर्वोक्तदोषप्रसङ्ग इति।

113ab

परिहरति—सिद्धमिति। अपोहो हि नामाभावः। स च भावधर्म

7 *Ślokavārttika apoha* 3c.

**1** ऽभ्युपेतव्य ] $A_1G_1S_1$; भ्युपगतः $K_1$ **4** °शब्दस्या° ] $A_1G_1K_1$; °शब्दाभावस्या° $S_1$ **5** न चा° ] $A_1G_1K_1$; न चास्या° $S_1$ **6** गोशब्दा° ] $A_1G_1$; गोशब्दो ऽ° $K_1S_1$ **6** संभवति ] $A_1G_1K_1$; भवति $S_1$ **6** सामान्यरूपानुपपत्तेः ] $A_1G_1$; सामान्यरूपत्वानुपपत्तेः $K_1$; असामान्यरूपापत्तेः $S_1$ **7** तदेतदाह—निषेधेति ] $A_1G_1S_1$; ++तदाह निषेधद्वययोगित्वादसतो याप्यभावता सवस्तुके भवेत् सापि न तुच्छे बुद्ध्यसंभवात् $K_1$ **9** नन्विति ] $A_1G_1S_1$; ननु युक्त्यानयैवायं वस्तुनो पि न भिद्यते अपोहस्तेन दोषो त्र पूर्वोक्तो न भविष्यति $K_1$ **9** ऽयमवस्तुत्वेनापोहानाम° ] $A_1G_1K_1$; यमपोहानावस्तुस्वरूपत्वेना° $S_1^{ac}$; यमपोहानामवस्तुस्वरूपत्वेना° $S_1^{pc}$ **10** °क्तः, स न भविष्य° ] $A_1G_1S_1$; ++++++ $K_1$ **10** ययैव ] $A_1G_1K_1$; यथैव $S_1$ **10** मत्पक्षे ] $A_1G_1K_1$; om. $S_1$ **11** तयैव ] $A_1G_1$; तयैव हि $K_1$; तथैव $S_1$ **12** वस्तूनि ] $K_1S_1$; वस्तुनि $A_1G_1$ **14** सिद्धमिति ] $A_1G_1S_1$; सिद्धमेवम्मदिष्टं स्यान्नैवान्या गतिरस्ति हि $K_1$ **14** स च ] $A_1G_1K_1$; सर्व° $S_1$





इति वस्तुनो नात्यन्तं भिद्यत इतीष्टमेवेदमस्माकम्, नात्रान्यगतिरस्तीत्येष सिद्धान्त इति।

113cd

कथं पुनरेवं भवदिष्टसिद्धिः। न ह्यत्रास्माभिर्वस्तुरूपं सामान्यमङ्गीकृतं येनेष्टसिद्धिर्भवेत्। अपोहस्य तु वस्तुनो भेदः प्रतिषिद्धः। न चैतावता विधिरूपं सामान्यमभ्युपगतं भवति। अतः कथमिष्टसिद्धिः।

अत आह—अभाव इति। अयमभिप्रायः। अपोहस्तावद् वस्तुनो न भिद्यत इति भावाभावयोरभेदे ऽङ्गीकृते विचारयामः। किं येयमनुगताकारवस्तुबुद्धिः सापोहशब्दवाच्ये ऽभावे वासनावशात्। पारमार्थिकं किंचिद्वस्तुरूपं सामान्यं नास्त्येव। अथ वा वस्तुरूप एव गोत्वादिसामान्य इयमपोहरूपबुद्धिः, असंकीर्णस्वभावत्वात्सामान्यानामिति।

एवं च विचार्यमाणे वस्तुन्येवाभावबोधमुपपादयिष्यामः। वस्तुनस्तावदपोहस्याभेदो भवद्भिरभ्युपगतः। स चास्मत्सिद्धान्त एव। न चासाधारणस्य वस्तुनो ऽपोहालम्बनता संभवतीत्युक्तम् "नेष्टो

16 *Ślokavārttika apoha* 3a.

**1** °वधर्म इति वस्तु° ] $A_1G_1S_1$; +++++++ $K_1$ **1** इतीष्ट° ] $A_1G_1K_1$; इति दृष्ट° $S_1$ **1** नात्रान्यगति° ] $A_1G_1$; नात्रान्यागति° $K_1$; नान्या गति° $S_1$ **2** °त्येष ] $A_1G_1$; °त्येष एव $K_1S_1$ **4** °वं भवदिष्ट° ] $A_1G_1K_1$; °वमिष्ट° $S_1$ **5** प्रतिषिद्धः ] $A_1G_1K_1$; सिद्धः $S_1$ **6** °भ्युपगतं ] $A_1G_1S_1$; ++++ $K_1$ **8** °द्धिः। अत आ° ] $A_1G_1K_1$; °द्धिरित्या° $S_1$ **8** अभाव इति ] $A_1G_1S_1$; अभावे वस्तुबुद्धिर्वा यद्वा वस्तुन्यभावधीर् $K_1$ **11** °र्थिकं ] $A_1G_1K_1$; °र्थिकं तु $S_1$ **11** किंचि° ] $A_1G_1S_1$; ++ $K_1$ **11** नास्त्येव ⋯ वस्तुन्येवाभाव° ] $A_1G_1S_1$; नास्त्येवाव° $K_1$(eyeskip) **12** इयम° ] $A_1G_1$; इयमन्या° $S_1$ **12** °पोहरूप° ] $A_1G_1$; °पोह° $S_1$ **13** °त्वात्सा° ] $A_1G_1$; °त्वाद्गोत्वादिसा° $S_1$ **14** च ] $A_1G_1$; om. $S_1$ **16** न चा° ] $A_1G_1K_1$; om. $S_1$

ऽसाधारणस्तावत्” इत्यत्र। अतो ऽर्थाद् गोत्वादिसामान्यमेव वस्तुरूपं गवादिशब्दानामालम्बनं भवेत्। एवं चेष्टसिद्धिरिति।

114

एवं च संशये वस्तुन्येवाभावबोधो न्याय्यः, वस्तूनामबाधिताकारबुद्धिबोध्यत्वात्, तेषां चान्योन्याभावात्मकत्वात्। यदि तु वस्तुरूपशून्यमन्यापोहात्मकमेव केवलं सामान्यमिष्यते, ततो ऽनिमित्तैव वस्तुबुद्धिर्भवेत्। यथा च वासना न निमित्तम्, तथोक्तमेव। अतो यस्मिन्नेव पक्षे भावाभावबुद्ध्योः सत्यत्वं सिध्यति, स एव पक्षो न्याय्य इति। वस्तुरूपे च सामान्ये ऽन्यापेक्षयाभावबोध इति सिद्धमित्याह—तत्रेति।

115–116c

अत्र भिक्षुणा जात्यभिधानपक्षे जातेरजातित्वान्नीलोत्पलादिशब्देषु विशेषणविशेष्यत्वसामानाधिकरण्ययोरनुपपत्तिरुक्ता। उक्तं च—

न जातिशब्दो भेदानामानन्त्यव्यभिचारतः।

---

**14** न जातिशब्दो ··· °पृथक्श्रुतेः ] *Pramāṇasamuccaya* 5.2.

---

**1** °णस्तावत् ] $A_1G_1K_1$; °ण $S_1$ **1** इत्यत्र ] $K_1S_1$; इत्युक्तम् $A_1G_1$ **1** ऽर्थाद् गोत्वादि° ] $A_1G_1K_1$; र्थत्वादि° $S_1$ **1** °मेव वस्तुरूपं ··· एवं चेष्टसिद्धिरिति। एवं च ] $A_1G_1S_1$; +++++++++++++++++++सिद्धिरित्येवञ्च $K_1$ **2** °शब्दानामा° ] $A_1G_1$; °शब्दा° $S_1$ **5** °बाधिताकार° ] $A_1G_1S_1$; °बाधिकार° $K_1$ **5** चान्योन्या° ] $A_1G_1K_1$; चापोह्या° $S_1$ **5** तु ] $A_1G_1K_1$; तद्° $S_1$ **6** °मन्यापोहा° ] $A_1G_1K_1^{pc}$; °मन्यापोहाहा° $K_1^{ac}$; °मपोहा° $S_1$ **6** °लं सामान्यमि° ] $A_1G_1K_1$; °लमि° $S_1$ **6** °ते, ततो ··· वासना न ] $A_1G_1S_1$; ++++++++++++++++++ $K_1$ **6** ऽनिमित्तैव ] $A_1G_1$; निर्निमित्तैव $S_1$ **8** भावाभाव° ] $A_1G_1K_1$; भावाभावात्म° $S_1$ **9** वस्तुरूपे च ] $A_1G_1$; वस्तुरूपे $K_1$; वस्तुस्वरूप एव $S_1$ **10** तत्रेति ] $K_1$; त++++++++++++++++++++बुद्धिस्तु सिध्यत्यन्यमपेक्ष्य तु $K_1$ **12** अत्र ] $A_1G_1K_1$; तत्र $S_1$ **12** °शब्देषु ] $A_1G_1K_1$; °शब्देष्विव $S_1$ **13** °सामानाधिकरण्य° ] $A_1G_1K_1$; °समानाधिकरण° $S_1$ **14** °मानन्त्य° ] $A_1G_1$; +++ $K_1$; °मानंत्याद् $S_1$ **14** °व्यभिचारतः ··· भेदा° ] $A_1G_1S_1$; ++++++++++++++++ $K_1$





वाचको योगजात्योर्वा भेदार्थैरपृथक्श्रुतेः॥ इति।

अत्र ह्यानन्त्यव्यभिचाराभ्यां जातिवाचिनो गवादिशब्दस्य भेदवाचितां निराकृत्य भेदार्थैः शब्दैरपृथक्श्रुतेः सामानाधिकरण्याद् योगजातिवचनता निराकृता। तत्र संबन्धाभिधाने ऽनुयोगतुल्यतां परस्ताद् वक्ष्यति। जात्यभिधानपक्षोक्ता त्वनुपपत्तिर्बौद्धस्यापि समानेति दर्शयति—अपोहेति सिद्धिरन्तेन।

116cd–117ab

असिद्धौ कारणमाह—न हीति। यद्धि यत्र समवैति, तत्तस्य विशेषणम्, इतरथातिप्रसङ्गात्। अतो यथा नोत्पलजातौ नीलजातिः समवैतीति नीलोत्पलशब्दयोर्विशेषणविशेष्यभावानुपपत्तिः, एवं नानीलापोहे ऽनुत्पलापोहः, अनुत्पलापोहे ऽनीलापोह इत्यपोहयोरपि विशेषणविशेष्यभावो नोपपद्यत इति।

117cd

न चाभिधेयानपेक्षयोः शब्दयोरेव विशेष्यविशेषणे संभवत इत्याह—शब्दयोरिति।

---

**5** परस्ताद् वक्ष्यति ] *Ślokavārttika apoha* 130cd.

---

**2** अत्र ] $A_1G_1S_1$; तत्र $K_1$ **4** °ने ऽनुयो° ··· जात्यभिधान° ] $A_1G_1S_1$; ++++++++++++++++++ $K_1$ **4** °गतुल्यतां ] $A_1G_1$; °गतां $S_1$ **6** अपोहेति सिद्धिरन्तेन ] $A_1G_1$; अपोहमात्रवाच्यत्वं यदि वाभ्युपगम्यते नीलोत्पलादिशब्देषु शबलार्थाभिधायिषु विशेषणविशेष्यत्वसमानाधिकरण्ययोः न सिद्धिः $K_1$; अपोहेति न सिद्धिरंतेन $S_1$ **8** असिद्धौ ] $A_1G_1K_1$; तत्सिद्धौ $S_1$ **8** °रणमाह—न हीति ] $A_1G_1S_1$; ++++++++++++++++++++रस्तस्मान विशेष्यविशेषणे $K_1$ **9** °णम्, इतरथाति° ] $A_1G_1K_1$; °णप्रति° $S_1$ **9** नोत्पल° ] $A_1G_1K_1$; नीलोत्पल° $S_1$ **9** नीलजातिः ] $A_1G_1S_1$; नीलादिस् $K_1$ **10** समवैतीति ] $A_1G_1$; सवैतीति $K_1$; समवैति $S_1$ **11** नानीलापोहे ··· इत्यपो° ] $A_1G_1S_1$; ++++++++++++++++++ $K_1$ **11** अनुत्पला° ] $A_1G_1$; नानुत्पला° $S_1$ **12** नोपपद्यत ] $A_1G_1K_1$; नोपपन्न $S_1$ **14** °योः शब्दयोरेव ] $A_1G_1$; °योरेव $K_1S_1$ **14** विशेष्यविशेषणे ] $A_1G_1K_1$; विशेषणविशेष्यत्वे $S_1$ **15** शब्दयोरिति ] $A_1G_1S_1$; शब्दयोर्नापि ते स्यातामभिधेयानपेक्षयोः $K_1$

118ab

अभिधेयभेदादेव च सामानाधिकरण्यमपि न नीलोत्पलशब्दयोरुपपन्नम्। अर्थो हि शब्दानामधिकरणम्। स चेद् भिन्नः, कथं तयोरैकाधिकरण्यमित्याह — सामानाधिकरण्यमिति।

118cd

ननु भिन्नार्थानामेव सामानाधिकरण्यम्, इतरथा पर्यायत्वापत्तेः। अर्थतो हीदमैकाधिकरण्यं भवद्भिरपीष्यत एव। जात्योर्हि तत्रैका व्यक्तिरधिकरणं नीलोत्पलशब्दवाच्ययोः। अतस्तावपि समानाधिकरणौ लक्ष्येते। तदिदमस्माकमपि समानम्, एकस्वलक्षणाधिकरणापोहद्वयवचनत्वेन सामानाधिकरण्योपपत्तेः।

मैवम्, अनाधेयत्वादपोहयोः। संभवति खलु वस्तुरूपयोर्जात्योरेकाधिकरणभावः, नापोहयोः, अवस्तुत्वाद् इत्याशङ्क्या सहाह — अर्थत इति।

119ab

किं चेदमेकमधिकरणमपोहयोर्यन्निबन्धनं शब्दयोः सामानाधिकरण्यम्। न तावदसाधारणम्, तस्य सविकल्पकबुद्धावप्रतिभासात्।

3 °लोत्पलशब्दयोरुपपन्नम् … °मधिकर° ] $A_1G_1S_1$; ++++++++++++++++++ $K_1$　3 अर्थो हि ] $A_1G_1$; अर्थः $S_1$　4 सामानाधिकरण्यमिति ] $A_1G_1S_1$; सामानाधिकरण्यञ्च न भिन्नत्वादपोहयोः $K_1$　6 °मेव ] $A_1G_1K_1$; °मपि $S_1$　6 °करण्यम् ] $A_1G_1S_1$; °करण्यमुपपन्नम् $K_1$　7 हीदमैकाधि° ] $A_1G_1S_1$; हिधसामानाधि° $K_1$　7 भवद्भिरपी° ] $A_1G_1S_1$; भवत्भिरि° $K_1$　7 °ष्यत एव ] $A_1G_1$; °ष्यते $K_1S_1$　7 °र्हि तत्रैका … °शब्दवाच्य° ] $A_1G_1S_1$; ++++++++++++++++++++ $K_1$　8 समाना° ] $G_1K_1$; सामाना° $A_1S_1$　9 °धिकरणौ ] $A_1G_1K_1$; °धिकरण्यौ $S_1$　10 °धिकरणापोह° ] $A_1G_1K_1$; °पोह° $S_1$　11 वस्तुरूप° ] $A_1G_1$; वस्तुभूत° $K_1S_1$　12 °त्योरेकाधिकरण° … इत्याशङ्क° ] $A_1G_1S_1$; ++++++++++++++++++++ $K_1$　12 °योः, अवस्तु° ] $A_1G_1$; °योर्वस्तु° $S_1$　13 अर्थत इति ] $A_1G_1S_1$; अर्थतश्चेत्तदिष्येत कीदृश्याधेयता तयोः $K_1$　15 किं चे° ] $A_1G_1K_1$; किं ने° $S_1$　15 °मेकम° ] $A_1G_1K_1$; °म° $S_1$





अन्यच्च शाब्दज्ञानगोचरो वस्तुरूपसामान्यं भवतां नास्त्येवेत्याह — न चेति। अस्माकं तु नीलोत्पलशब्दाभिहितजातिलक्षितैकव्यक्तिगोचरत्वादुपपन्नमर्थद्वारकं सामानाधिकरण्यमिति।

119cd

स्यादेतत्। मा नामैकमधिकरणं शाब्दज्ञानगोचरो भवतु। अस्ति तावत्तदिति। तन्न, अगम्यमानस्यैकार्थस्य शब्दसामानाधिकरण्यं प्रत्यनुपयोगादित्याह — अगम्यमानमिति।

120

अत्र भिक्षुणा जातिमदभिधानपक्षे विशेषणविशेष्यादिव्यवहारानुपपत्तिरुक्ता। जातिपरतन्त्रो हि तदा शब्दस्तद्वति वर्तेत। तत्र सच्छब्देनैकसत्ताजात्यवच्छिन्ने ऽभिहिते द्रव्ये तेनैव घटादिजातेरनाक्षेपात् कथं तद्वचनेन समावेश इति सन् घट इति सामानाधिकरण्यानुपपत्तिः। उक्तं च —

तद्वतो नास्वतन्त्रत्वात्॥ इति।

14 *Pramāṇasamuccaya* 5.4a.

1 अन्यच्च ] $A_1G_1K_1$; अन्यत्तु $S_1$　1 भवतां ] $A_1G_1$; भवतो $S_1$　1 °स्तुरूपसामान्यं … नास्त्येवेत्याह ] $A_1G_1S_1$; ++++++++++++++++++++ $K_1$　2 न चेति ] $A_1G_1S_1$; +++धारणं वस्तु गम्यते न्यच्च नास्ति ते $K_1$　2 °कव्यक्ति° ] $A_1G_1S_1$; °कस्य व्यक्ति° $K_1$　3 °द्वारकं ] $A_1G_1S_1$; °द्वारम्क $K_1$　3 °धिकरण्यमिति ] $A_1G_1S_1$; °धिकण्यमिति भावः $K_1$　5 मा नामैकम° ] $A_1G_1K_1$; मैका° $S_1$　5 शाब्द° ] $K_1S_1$; शब्द° $A_1G_1$　5 भवतु … °कार्थस्य ] $A_1G_1S_1$; ++++++++++++++++++++ $K_1$　7 अगम्यमानमिति ] $A_1G_1S_1$; अगम्यमानमैकार्थ्यं शब्दयोः क्वोपयुज्यते $K_1$　9 जातिमद° ] $A_1G_1K_1S_1^{pc}$; जात्य° $S_1^{ac}$　10 °तन्त्रो ] $A_1G_1K_1$; °तन्त्रे $S_1$　10 तदा शब्दस्तद्वति … °सत्ताजात्य° ] $A_1G_1S_1$; ++++++++++++++++++++ $K_1$　10 वर्तेत ] $A_1G_1$; वर्तनं $S_1$　11 °ब्देनैक° ] $A_1G_1$; °ब्दैक° $S_1$　11 ऽभिहिते द्रव्ये ] $A_1G_1K_1$; द्रव्ये भिहिते $S_1$　11 घटादिजातेरनाक्षेपात् ] $A_1G_1K_1^{pc}$; घटादिजातेरनापेक्षात्पात् $K_1^{ac}$; घटादि न नापेक्ष्यत् $S_1$　12 तद्वचनेन ] $A_1G_1K_1$; तद्वलेन $S_1$　14 °तन्त्रत्वात्॥ इति ] $A_1G_1S_1$; °तन्त्रादिति $K_1$(unmetrical)

अयमपि समानो बौद्धानामनुयोगः। तथा ह्यपोहवत्यपि वाच्ये भिन्नापोहपरतन्त्रा एव शब्दा नान्योन्यस्यार्थं व्याप्नुवन्तीत्यत्रापि तुल्यः प्रसङ्ग इति वक्ष्यमाणाभिप्रायेणाह — अथेति।

121–122

न चैकद्रव्यवृत्तित्वादेव सामानाधिकरण्यम्, शुक्लमधुरशब्दयोरपि प्रसङ्गात्। तथा ह्येकमेव द्रव्यमशुक्लामधुरापोहावुभावपि निविष्टौ। न चानयोः सामानाधिकरण्यं दृश्यते। न हि भवति संसर्गो मधुरं शुक्लमिति। भवति तु मधुरं खण्डं शुक्लं खण्डमिति द्रव्यविवक्षयैव तयोरपि कदाचित् समभिव्याहारो भवति। न गुणविवक्षया, गुणयोरितरेतरासमवायात्। अतो यथैकत्र खण्डे वर्तितुं मधुरादिभिर्भिन्नव्यपोह्यत्वादशुक्लामधुरापोह्यभेदाच्छुक्लाद्यर्थो न व्याप्त इति। तस्यैतैर्मधुरादिभिः शब्दैरनाक्षेपः। अत एव च नेतरस्येतरेण विशेषणं भवति। तथैव सच्छब्दादसद्व्युदासांशावच्छिन्नो ऽर्थो ऽवधारित

1 °मनुयोगः … भिन्नापोहपर° ] $A_1G_1S_1$ ; +++++++++++++++++++ $K_1$ 1 °वत्यपि ] $A_1G_1$ ; °वत्प्रत्यक्षे पि $S_1$ 2 नान्योन्यस्या° ] $A_1G_1$ ; नान्यस्या° $K_1$ ; नापोह्यस्या° $S_1$ 2 व्याप्नुव° ] $A_1G_1$ ; +++ $K_1$ ; प्राप्नुव° $S_1$ 3 इति वक्ष्यमाणा° ] $A_1G_1K_1$ ; इत्य° $S_1$ 3 अथेति ] $A_1G_1S_1$ ; अथान्यापोहवद्वस्तु वाच्यमित्यभिधीयते तत्रापि परतन्त्रत्वाद् व्याप्तिश्शब्देन दुर्लभा $K_1$ 5 चैकद्रव्यवृत्तित्वादेव ] $A_1G_1K_1$ ; चैकत्र घटत्वादेव $S_1$ 5 सामानाधिकरण्यम् ] $A_1G_1K_1$ ; सामान्यं $S_1$ 5 °मधुरशब्दयोरपि ] $A_1G_1S_1$ ; °मधुरयोरपि $K_1$ 6 द्रव्यमशुक्लामधुरा° ] $A_1G_1$ ; द्रव्यमशुक्लमधुरा° $K_1$ ; खंडद्रव्यमधुराशुक्ला° $S_1$ 6 °पोहावुभावपि ] $A_1G_1$ ; °पोहा+भाविवपि $K_1$ ; °पोहेनाभाववि $S_1$ 6 निविष्टौ ] $A_1G_1S_1$ ; निविष्टो $K_1$ 8 तु ] $A_1G_1S_1$ ; om. $K_1$ 9 °व तयो° ] $A_1G_1$ ; °व चानयो° $K_1$ ; °वानयो° $S_1$ 9 कदाचित् ] $A_1G_1K_1$ ; om. $S_1$ 9 °व्याहारो भव° ] $A_1G_1S_1$ ; +++++ $K_1$ 10 अतो ] $A_1G_1K_1$ ; om. $S_1$ 11 °दिभिर्भिन्नव्यपोह्य° ] $A_1G_1$ ; °दिभिन्नस्यपोह्य° $K_1$ ; °दिभिर्भिन्नापोह्य° $S_1$ 11 °शुक्ला° ] $A_1G_1K_1$ ; °शुक्ल° $S_1$ 12 °नाक्षेपः ] $A_1G_1S_1$ ; °नापेक्षा $K_1$ 13 विशेषणं ] $A_1G_1K_1$ ; om. $S_1$ 13 सच्छब्दा° ] $A_1G_1K_1$ ; तच्छब्दा° $S_1$ 13 °सांशा° ] $A_1G_1K_1$ ; °सांगा° $S_1$





इति। अघटादिनिवृत्त्यंशव्याप्तिर्न शाब्दी भवति। अतो दुर्घटं घटः सन्नित्यपि सामानाधिकरण्यं विशेषणविशेष्यभावश्चेत्यभिप्रायेणाह — खण्ड इति द्वयेन।

123ab

यदि तूच्यते — मा नाम सच्छब्दो ऽघटापोहं व्याप्नोतु। तदर्थस्त्वसद्व्यावृत्तिविशिष्टस्तेनापि संबन्धात् तं व्याप्नोति। अतश्च विशेषणादिसिद्धिरिति।

समानमिदमितरस्यापि। सच्छब्दाभिहिता सत्ता घटत्वादिमन्तमर्थं व्याप्नोतीत्याशङ्कया सहाह — व्याप्तिरिति। सिद्धान्ताभिप्रायेणैव च सत्तयैवेत्युक्तम्। आकृतिवचनता सिद्धान्ते स्थास्यति। तद्वदभिधानानुसारेण तु सता द्रव्येण व्याप्तिरिति दर्शयितव्यमिति।

123cd

व्याप्तिमेव दर्शयति — नेति। घटत्वादिमान् खल्वर्थो निरवशेष एव सत्तया व्याप्त इति। एतावानेवानयोर्भेदो यन्नो वस्तुरूपा सत्ता, परेषां तु व्यावृत्तिरूपा।

124ab

10 स्थास्यति ] *Jaiminisūtra* 1.3.33: आकृतिस्तु क्रियार्थत्वात्।

1 °वृत्त्यंश° ] $A_1G_1K_1$ ; °वृत्तिर्नंश° $S_1$ 3 खण्ड इति द्वयेन ] $A_1G_1S_1$ ; खण्डे भिन्नव्यपोहत्वादथैव मधुरादिभिः शुक्लादिव्याप्त्यभावेन नाक्षेपो न विशेषणम् तथैवासद्व्युदासांशविच्छिन्नार्थावधारणे नाघटादिनिवृत्त्यंशव्याप्तिश्शब्दात् प्रतीयते $K_1$ 6 तं ] $A_1G_1K_1$ ; तद् $S_1$ 8 °नमिदमित° ] $A_1G_1K_1$ ; °नमित° $S_1$ 8 घटत्वादि° ] $A_1G_1K_1$ ; घटादि° $S_1$ 9 °मन्तमर्थं ] $A_1G_1$ ; °मंतं $K_1S_1$ 9 व्याप्तिरिति ] $A_1G_1S_1$ ; व्याप्तिश्चेदर्थरूपेण सत्तयैव हि सा भवेत् $K_1$ 10 °प्रायेणैव च ] $A_1G_1$ ; °प्रायेण च $K_1$ ; °प्रायेण $S_1$ 10 सत्तयैवे° ] $K_1$ ; सत्तयेवे° $A_1G_1$ ; सत्तये° $S_1$ 10 °वचनता ] $A_1G_1K_1$ ; °वचनता हि $S_1$ 11 तद्वदभिधाना° ] $A_1G_1S_1$ ; तद्वदनुसाभिधाना° $K_1$ 11 तु ] $A_1G_1K_1$ ; om. $S_1$ 11 सता ] $A_1G_1K_1$ ; सत्ता $S_1$ 13 नेति ] $A_1G_1S_1$ ; न घटत्वादिमानर्थः कश्चिन्न व्याप्यते तया $K_1$ 14 °वानेवानयो° ] $A_1G_1$ ; °वानेवावयो° $K_1$ ; °वानानयो° $S_1$ 14 सत्ता ] $A_1G_1K_1$ ; om. $S_1$

न चेयं वस्तुरूपता सत्तायाः सच्छब्दस्य घटाद्यर्थव्याप्तिं वारयति। प्रत्युतानुगुणैव वस्तुता व्याप्तौ, अवस्तुनो निःस्वभावस्य तदसंभवादित्यभिप्रायेणाह—न हीति।

124cd

यथा चासदपोहो ऽवस्तुरूपो द्रव्यद्वारेणाघटापोहे प्रतीतिं जनयति, एवं वस्तुरूपापि सत्तेत्यविशिष्टैवार्थद्वारिका व्याप्तिरित्याह—प्रतीतिमिति।

125ab

यदि मतम्—निर्भागं नो वस्तु। तदसदपोहात्मना प्रतीयमानं द्व्यात्मकमेवावगतं भवति। भवतस्तु सभागवस्तुवादिनो नैकभागावग्रहे भागान्तराणां संवित्तिरस्ति। अतो न तुल्यत्वमिति।

तन्न। यद्यपि निर्भागो वस्त्वात्मा भवताम्, शब्दात् तावद् भागावग्रहा जायन्त इत्यविशेष एवेत्यभिप्रायेणाह—निर्भाग इति।

125cd

भागावग्रहमेव दर्शयति—न हीति।

---

1 सत्तायाः सच्छ॰ ] $A_1G_1^{pc}S_1$; सत्ताया च्छ॰ $G_1^{ac}$; सत्ताया सच्छ॰ $K_1$ 1 ॰र्थव्याप्तिं ] $S_1$; ॰र्थव्याप्तिः $A_1G_1$; ॰र्थेन व्याप्तिं $K_1$ 2 व्याप्तौ ] $K_1$; व्याप्ता $A_1G_1S_1$ 2 निःस्वभावस्य ] $A_1G_1K_1$; निर्भागः $S_1$ 3 न हीति ] $A_1G_1S_1$; न च वस्तुतया व्याप्तिस्तया शब्दस्य वार्यते $K_1$ 5 चासदपोहो ] $A_1G_1K_1$; चासदपोह्यो $S_1$ 5 ॰णाघटापोहे ] $G_1K_1S_1$; ॰ण घटापोहे $A_1$ 5 जनयति ] $A_1G_1K_1$; जनयंत्य् $S_1$ 6 वस्तुरूपापि ] $A_1G_1S_1$; वस्तुरूपा $K_1$ 6 सत्तेत्य॰ ] $A_1G_1$; सत्तैवेत्य॰ $K_1$; सत्येत्य॰ $S_1$ 7 प्रतीतिमिति ] $A_1G_1S_1$; प्रतीतिं प्रति तुल्यस्तु व्यापारो वस्त्ववस्तुनोः $K_1$ 9 नो ] $A_1G_1K_1$; हि नो $S_1$ 9 तदसद॰ ] $A_1G_1$; तदस॰ $K_1$; सदसद॰ $S_1$ 10 सभागवस्तु॰ ] $A_1G_1K_1$; सभाग॰ $S_1$ 10 ॰ग्रहे ] $A_1G_1K_1$; ॰ग्रहि॰ $S_1$ 12 यद्यपि ] $A_1G_1K_1$; यद्यप्यसौ $S_1$ 12 शब्दात् ] $A_1G_1K_1$; शब्दानां $S_1$ 13 ॰ग्रहा ] $A_1G_1K_1$; ॰ग्रह एव $S_1$ 13 जायन्त ] $A_1G_1K_1$; ऽजायत $S_1$ 13 निर्भाग इति ] $A_1G_1S_1$; निर्भागो पि च वस्त्वात्मा शब्दैर्भागेन गम्यते $K_1$ 15 भागावग्रहमेव ] $A_1G_1K_1$; भागावगमे तु शब्दान् $S_1$ 15 न हीति ] $A_1G_1S_1$; न हि सच्छब्दविज्ञहनात् घटाद्यर्थः प्रतीयते $K_1$(unmetrical)





126a

अतः समानो ऽनाक्षेपदोष इत्युपसंहरति—तेनेति।

126b

यदपि चात्रैव जातिमदभिधानपक्षे विशेषणमात्राभिधायित्वाच्छब्दस्य तद्वति गौणत्वमित्युक्तम्। तदप्यपोहवदभिधाने ऽपि समानमित्याह—भाक्तेति।

126cd

एतदेव विवृणोति—विशेषणत्वादिति। अवश्यं हि विशिष्टाभिधाने प्रथमतरं विशेषणाभिधानमापतति। तदेवं स एव मुख्यो ऽर्थो ऽसदपोहः सच्छब्दस्य यथा जातिवादिनो जातिरिति।

127ab

अतस्तद्वति वर्तमानः शब्दो गौण इति न तद्वतो ऽभिधेयत्वं संभवतीत्याह—तस्मादिति।

127c

अत्र किंचिदाशङ्कते—अवस्तुत्वादिति। अयमभिप्रायः। मुख्यत्वं नाम वस्तुधर्मः कथमपोहस्यावस्तुरूपस्य भवेत्। भवतस्तु वस्तुरूपा

---

5 ॰त्युक्तम् ] *Pramāṇasamuccaya* 5.4b: उपचारात्।

---

2 समानो ऽनाक्षेप॰ ] $A_1G_1K_1^{pc}$; समानो नापेक्षेप॰ $K_1^{ac}$; सामामान्येनाक्षेप॰ $S_1$ 2 तेनेति ] $A_1G_1S_1$; तेनानाक्षेपदोषो स्ति $K_1$ 4 यदपि ] $A_1G_1K_1$; अपि $S_1$ 4 ॰भिधायि॰ ] $A_1G_1K_1$; ॰वसायि॰ $S_1$ 5 ॰त्वाच्छब्दस्य ] $K_1$; ॰तच्छब्दस्य $A_1G_1$; ॰त्वाछब्दस्य $S_1$ 5 गौणत्वमि॰ ] em.; गौणवत्त्वमि॰ $A_1G_1$; गौ+++मि॰ $K_1$; गौण इ॰ $S_1$ 5 तदप्यपोहवद॰ ] $A_1G_1K_1$; तदपोहा॰ $S_1^{ac}$; तदपोहवद॰ $S_1^{pc}$ 6 समानमि॰ ] $A_1G_1K_1$; समानमेवे॰ $S_1$ 6 भाक्तेति ] $A_1G_1S_1$; भाक्तदोषश्च विद्यते $K_1$ 8 विशेषणत्वादिति ] $A_1G_1S_1$; विशेषणत्वान्मुख्यत्वमपोहस्य च जातिवत् $K_1$ 9 तदेवं ] $G_1K_1S_1$; तदेव $A_1$ 10 ॰वादिनो ] $A_1G_1K_1$; ॰वचनो $S_1$ 12 न तद्वतो ऽभिधेयत्वं ] $A_1G_1K_1$; तद्वतो भिधेयत्वं न $S_1$ 13 तस्मादिति ] $A_1G_1S_1$; तस्मात्तद्वति गौणत्वान्नाभिधेयत्वसंभवः $K_1$ 15 अत्र ] $A_1G_1$; तत्र $K_1S_1$ 15 ॰शङ्कते ] $A_1G_1S_1$; ॰शंकतो $K_1$ 15 अवस्तुत्वादिति ] $A_1G_1S_1$; अवस्तुत्वान्न मुख्यश्चेत् $K_1$

जातिर्मुख्या, तद्वांस्तु गौण इति युक्तमभिधानमिति।

127d

परिहरति—नेति। यद्यपोहो ऽवस्तुरूप इति मुख्यो नेष्यते, कथमसौ विशेषणं भविष्यति। विशेषणत्वमपि वस्तुधर्म एव।

स्यादेतत्। कल्पनामात्रघटितो विशेषणादिव्यवहारो न वस्तुसंनिवेशी। अतो यदेव यथा विशेषणविशेष्यादिरूपेणावसीयते, तद् यथादर्शनं तथैवाश्रीयते। न तु वास्तवो विशेषणविशेष्यादिव्यवहारः। तदाहुः—

यथाप्रतीतिकथितः शब्दार्थो ऽसावसन्नपि।
सामानाधिकरण्यं च वस्तुन्यस्य न संभवः॥ इति।

तदयुक्तम्। कथं ह्यबाधिताकारसंवित्संवेद्यः सामानाधिकरण्यादिव्यवहारो ऽवास्तवो भवेत्। अपि चैवमलमपोहव्यसनेन। सन्तु वस्त्वाकारसामान्यसंवेदनाश्रया एव सामानाधिकरण्यादिव्यवहाराः। एवं ते यथाप्रतीत्याश्रिता भवन्ति, इतरथा प्रतीत्यपलापापत्तेरित्युक्तमेवेति।

128abc

यदपि चापरमत्रैव भिक्षुणोक्तम्—

9 यथा° ⋯ संभवः ] *Pramāṇavārttika* 1.84.

1 तद्वांस्तु ] $A_1G_1K_1$; तद्वान् $S_1$　3 नेति ] $A_1G_1S_1$; न स्यादेवं विशेषणम् $K_1$　3 यद्यपोहो ऽवस्तु° ] $A_1G_1K_1$; यो प्यवस्तु° $S_1$　4 कथमसौ विशेषणं ⋯ °विशेष्यादिरूपेणावसीयते ] $A_1G_1K_1$; कथमसौ विशेषणविशेष्यादिरूपेणावसीयते $S_1$(eyeskip)　7 तु ] $A_1G_1K_1$; पुनर् $S_1$　7 विशेषणविशेष्यादि° ] $A_1G_1K_1$; विशेषणादि° $S_1$　10 च ] $A_1G_1K_1$; om. $S_1$(unmetrical)　10 संभवः ] $A_1G_1K_1$; संभवति $S_1$(unmetrical)　11 °वेद्यः ] $A_1G_1K_1$; °वेद्यं $S_1$　12 ऽवास्तवो ] $A_1G_1$; न वा++ $K_1$; न वास्तवो $S_1$　13 °करण्यादि° ] $A_1G_1S_1$; °करण्य° $K_1$　14 एवं ] $A_1G_1S_1$; एवं हि $K_1$　14 भवन्ति ] $A_1G_1K_1$; भवं $S_1$　14 इतरथा ] $A_1G_1K_1$; इतरथा तु $S_1$　15 °पलापापत्तेरित्युक्तमेवेति ] $A_1G_1K_1$; °पलाप एवेत्युक्तमितरेति $S_1$　17 यदपि चापर° ] $A_1G_1K_1$; यदि वापर° $S_1$　17 °मत्रैव ] $A_1G_1K_1$; °मत्रैव पक्षे $S_1$





तद्वांस्तु भेद एवोक्तः स च पूर्वं निराकृतः। इति।

तदप्यपोहवदभिधाने समानम्। अपोहवन्तो हि भेदा एवाभिधातव्याः। ते चानन्त्यव्यभिचाराभ्यामवाच्याः, अनन्तैः संबन्धग्रहणाशक्तेः। एकत्र संबन्धावसाये ऽन्यत्राप्रयोगप्रसङ्गः। तत्र वा प्रयोगे वाच्यव्यभिचारः। तदेतदाह—भेदा इति भ्यामन्तेन।

128d

अन्यस्तु सकलभेदानुयायी नापोहवान्नाम कश्चिदस्ति भवतां यो ऽव्यभिचारी गवादिशब्दानामर्थो भविष्यतीत्यभिप्रायेणाह—अन्य इति।

129ab

यदि त्वपोहवत्त्वमात्रमेव शब्दानां वाच्यमिष्यते, नैकः कश्चिदपोहवान्, अतश्च नानन्त्यव्यभिचारावित्युच्यते। तदयुक्तम्, सकलभेदानुगतस्यापोहवत्त्वस्य तेषामसिद्धत्वादित्याह—नेति।

1 *Pramāṇasamuccaya* 5.8cd: तद्वांश्च भेद एवोक्तः स च पूर्वं निराकृतः॥

1 तद्वांस्तु ] $A_1G_1K_1$; तद्वस्तु $S_1$　1 एवोक्तः ] $A_1G_1K_1$; एवेष्टः $S_1$　1 स च ] $A_1G_1K_1$; सर्वं $S_1$　1 पूर्वं ] $K_1S_1$; पूर्व° $A_1G_1$　1 निराकृतः। इति ] $A_1G_1$; निराकृति $K_1$; निराकृतं $S_1$　2 °भिधाने ] $A_1G_1$; °भिधाने पि $K_1$; °भिधानपक्षे $S_1$　2 हि ] $A_1G_1K_1$; पि $S_1$　3 एवाभिधातव्याः ] $A_1G_1K_1$; एवाभेदान् $S_1$　4 एकत्र ] $A_1G_1K_1$; एकत्रैव $S_1$　4 तत्र ] $A_1G_1K_1$; अत्र $S_1$　5 वाच्यव्यभिचारः ] $A_1G_1$; वाच्यव्यवहारः $K_1$; व्यभिचारः $S_1$　5 तदेतदाह ] $A_1G_1K_1$; तदाह $S_1$　5 भेदा इति भ्यामन्तेन ] $A_1G_1S_1$; भेदाश्चापोहवन्त स्युस्तेषाञ्चावाच्यतोदिता आनन्त्यव्यभिचाराभ्याम् $K_1$　7 सकलभेदानुयायी ] $A_1G_1S_1$; भवतां सकलभेदानयायी $K_1$　7 °पोहवान्नाम ] $A_1G_1K_1$; °पोहवन्नाम $S_1$　7 भवतां ] $A_1G_1S_1$; om. $K_1$　8 °तीत्यभिप्रायेणाह ] $A_1G_1K_1$; °तीत्याह $S_1$　9 अन्य इति ] $A_1G_1S_1$; अन्यो नास्ति त्वपोहवान् $K_1$　11 वाच्य° ] $A_1G_1S_1$; वाच्यत्व° $K_1$　11 नैकः कश्चिद° ] $A_1G_1K_1$; नैकमद° $S_1^{ac}$; नैकवद° $S_1^{pc}$　12 अतश्च ] $A_1G_1K_1$; ततश्च $S_1$　12 नानन्त्य° ] $A_1G_1K_1$; नानंत° $S_1$　12 °भिचाराावि° ] $A_1G_1K_1$; °भिचारी° $S_1$　13 °सिद्धत्वादि° ] $A_1G_1$; °संभवादि° $K_1S_1$　13 नेति ] $A_1G_1S_1$; नापोहवत्वमन्यद्धि भेदापोहान्तरे स्तिते $K_1$

भेदापोहाः शाबलेयादयः। ते हि भेदान्तरार्थान् बाहुलेयादीनपोहन्ते। यदाहुः—

भेदो भेदान्तरार्थं तु विरोधित्वादपोहते। इति।

तदेकस्माद् भेदापोहादन्यस्मिन् भेदापोहे नापोहवत्त्वमेकमनुगतमस्तीत्यर्थः। अन्ये तु भेदापोहयोर्मध्ये नापोहवत्त्वमस्तीति व्याचक्षत इति।

129cd–130ab

अपि चेदमपोहवत्त्वं विकल्पनीयं भावात्मकमभावरूपं वेति। भावात्मकत्वे तावन् मीमांसकाभिमता जातिरेव शब्दान्तरेणाश्रिता भवेत्। इतरथा तु पूर्ववत् पर्यायत्वादिदोषप्रसङ्ग इत्याह—तच्चेति।

130cd

यदपि चात्र बौद्धैरुक्तम्—

तद्वन्मात्रे ऽपि संबन्धः सत्ता वेति विचारितम्। इति।

तत्तेषामपि समानमित्याह—संबन्ध इति। यथैव हि जातिजातिमत्संबन्धाभिधाने सामानाधिकरण्यानुपपत्तिः परैरुक्ता, तथापोहतद्वतोरपि संबन्धे वाच्य इष्यमाणे स एव प्रसङ्गो दर्शयितव्यः। अ-

**3** *Pramāṇasamuccaya* 5.28ab.
**13** *Pramāṇasamuccaya* 5.9ab.

**1** ते हि ] $A_1G_1S_1$; ते पि हि $K_1$　**1** भेदान्तरार्थान् ] $A_1G_1$; भेदान्तरान् $K_1$; भेदान्तराद् $S_1$　**2** यदा° ] $A_1G_1S_1$; तदा° $K_1$　**3** भेदान्तरार्थं ] $K_1S_1$; भेदान्तरार्थस् $A_1G_1$　**3** विरोधित्वा° ] $A_1G_1S_1$; विरोधि स्या° $K_1$　**5** °गतम° ] $A_1G_1K_1$; °गतमन्यद° $S_1$　**8** वेति ] $K_1S_1$; वा $A_1G_1$　**10** इतरथा तु ] $A_1G_1K_1$; इतरथात्र $S_1$　**10** °दोषप्रसङ्ग ] $A_1G_1K_1$; °प्रसंगाद् $S_1$　**10** तच्चेति ] $A_1G_1S_1$; तच्चापि कल्प्यमानं स्यादभावो भाव एव वा वस्तु चेज्जातिरेवासाववस्तुत्वे पि पूर्ववत् $K_1$　**12** यदपि चात्र ] $A_1G_1$; यदपि चात्रैव $K_1$; तद्यदपि चत्रैव $S_1$　**14** संबन्ध इति ] $A_1G_1S_1$; संबन्धो वैष कल्प्येत तस्य चेष्टा न वाच्यता $K_1$　**14** यथैव ] $A_1G_1K_1$; तथैव $S_1$　**15** जातिजातिमत्सं° ] $A_1G_1$; जातिमत्सं° $K_1S_1$　**16** संबन्धे ] $A_1G_1$; सम्बन्धो $K_1$; संबन्ध $S_1$





पोहवच्छब्दाच्च तद्धितान्तादुत्पन्नो भावप्रत्ययः संबन्धवाच्येव “कृत्तद्धितसमासेषु संबन्धाभिधानं त्वतल्भ्याम्” इति स्मृतेः। अतः संबन्ध एवापोहवत्त्वम्। तस्य च तैरेव न वाच्यतेष्यते, तद्वचनत्वे दूषणाभिधानात्।

“सत्ता वा” इति च सामान्यवचनत्वमेवाशङ्कितम्। तदपि चास्माभिरपोहवन्मात्राभिधाने ऽप्याशङ्क्यानन्तरं विकल्प्य दूषितम्। इहैव च संबन्धवाच्यता निराकृता।

पूर्वं त्वपोहविशिष्टवाच्यता प्रत्युक्ता, अपोहस्यावस्तुनो विशेषणत्वानुपपत्तेः, “न चाप्यश्वादिशब्देभ्यः” इत्यादिना। ततः पुनः “अपोहमात्रवाच्यत्वम्” इत्यादिना केवलापोहाभिधाने ऽनुयोगतुल्यत्वमुक्तम्। “अथान्यापोहवत्” इत्यादिना तु विशिष्टाभिधाने।

**2** Source unknown. Cf. Pind 2015: II 42, n. 130.
**5** *Pramāṇasamuccaya* 5.9b.
**6** दूषितम् ] *Ślokavārttika apoha* 128d.
**9** *Ślokavārttika apoha* 88a (88–91).
**10** *Ślokavārttika apoha* 115a (115–119).
**11** *Ślokavārttika apoha* 120a (120–130ab).

**1** अपोहवच्छब्दाच्च ] $A_1G_1K_1$; अपोहवच्छब्दात् $S_1$　**1** संबन्धवाच्येव ] $A_1G_1K_1$; संबन्धवाच्येषु $S_1$　**2** त्वतल्भ्याम्” इति ] em.; त्वतज्ञामिति $A_1G_1$; +++++ति $K_1$; त्वतलाभ्यामिति $S_1$　**3** एवापोहवत्त्वम् ] $K_1S_1$; एवापोहत्वम् $A_1G_1$　**3** तस्य च ] $A_1G_1K_1$; तस्य $S_1$　**3** वाच्यतेष्यते ] $A_1G_1K_1$; वाच्यतेष्टा $S_1$　**4** °भिधानात् ] $A_1G_1K_1$; °भिधात् $S_1$　**5** वा” इति ] $A_1G_1K_1$; चेति $S_1$　**5** °त्वमेवाशङ्कितम् ] $K_1$; °त्वमेव शङ्कितम् $A_1G_1$; °त्वमाशङ्कितम् $S_1$　**6** ऽप्याशङ्क्या° ] $A_1G_1S_1$; शंक्या° $K_1$　**6** °नन्तरं विकल्प्य ] $A_1G_1K_1$; °नन्तरमेव $S_1$　**8** °विशिष्ट° ] $K_1S_1$; °विशिष्टस्य $A_1G_1$　**8** प्रत्युक्ता ] $A_1G_1S_1$; निराकृता $K_1$　**8** °स्यावस्तुनो ] $A_1G_1S_1$; °स्य वावस्तुनो $K_1$　**9** विशेषणत्वा° ] $K_1S_1$; विशेषणा° $A_1G_1$　**9** न चाप्य° ] $A_1G_1K_1$; न चा° $S_1$　**9** ततः ] $A_1G_1K_1$; अतः $S_1$　**10** °मात्रवाच्यत्वम् ] $S_1$; °मात्रवाचित्वम् $A_1G_1$; °वाच्यमात्रत्वम् $K_1$　**10** °भिधाने ऽनु° ] $A_1G_1$; °भिधानेन $K_1$; °भिधानेनानु° $S_1$　**11** अथान्यापोहवत् ] $A_1G_1K_1$; अथापोहवद् $S_1$　**11** तु ] $A_1G_1$; om. $K_1$; यत्र $S_1$

अत्र तु संबन्धाभिधान इति विवेक इति।

131abcd

यदपि चेदमपरं बौद्धैरुक्तम्। तद्वदभिधानपक्ष एव को ऽयं तद्वान्नाम। यदि घटः, न पटे सच्छब्दो वर्तेत। इतरथा वा, न घटे, भेदानामितरेतरानुगमाभावात्। एवं सामान्यरूपः सच्छब्दार्थो न भवेत्। यथाहुः—

तद्वानर्थो घटादिश्चेन् न पटादिषु वर्तते।
सामान्यमर्थः स कथम्। इति।

तद्वदवाच्यतेति तदप्यपोहवदभिधाने समानमित्याह—न चेति वाच्यमन्तेन। अपोहवानपि य एव कश्चिदेको घटादिराश्रितः, स एव नार्थान्तरे वर्तत इति न सामान्यवचनता सिध्यति। न केवलं सामानाधिकरण्यानुपपत्त्यासामान्यवाच्यत्वम्। तद्वदभिधानपक्षे ऽपि तद्वतामनुगमाभावान्न सामान्यवचनता सिध्यतीत्यपिशब्दस्यार्थः।

131d

अत एव सच्छब्देन यत्र क्वचिदेकस्मिन्नर्थे सत्ताविशिष्ट उक्ते तस्या-

7 तद्वानर्थो … कथम् ] *Pramāṇasamuccaya* 5.9cd–10a.

1 °भिधान ] $A_1G_1K_1$; °भिधानम् $S_1$ 1 विवेक इति ] $K_1S_1$; विवेक इति गतम् $A_1G_1$ 3 बौद्धै° ] $A_1G_1K_1$; परै° $S_1$ 4 वर्तेत ] $A_1G_1$; वर्तते $K_1$; वर्तत $S_1$ 4 घटे ] $A_1G_1S_1$; घट $K_1$ 5 °तरानुगमाभावात् ] $A_1G_1K_1$; °तराद् $S_1$ 5 एवं ] $A_1G_1$; एवञ्च $K_1$; एवं च न $S_1$ 5 सच्छब्दार्थो ] $A_1G_1K_1$; शब्दार्थो $S_1$ 5 न भवेत् ] $A_1G_1K_1$; भवेत् $S_1$ 9 तद्वदवाच्यतेति ] $K_1S_1$; तद्वदवाच्यत्वे ऽपि $A_1G_1$ 9 °भिधाने ] $A_1G_1K_1$; °भिधाने पि $S_1$ 10 न चेति वाच्यमन्तेन ] $A_1G_1$; न चैको पेहवानर्थो वर्तते र्थान्तरे क्वचित् तस्मादपि न सामान्यं वाच्यं $K_1$; न चेति $S_1$ 11 सिध्यति ] $A_1G_1K_1$; सिध्यतीत्यपिशब्दार्थः $S_1$ 12 °सामान्यवाच्यत्वम् ] $A_1$; सामान्यावाच्यत्वम् $G_1$; सामान्यमवाच्यम् $K_1$; सामान्यं वाच्यं $S_1$ 12 ऽपि ] $A_1G_1S_1$; om. $K_1$ 13 °शब्दस्यार्थः ] $A_1G_1$; °शब्दस्यार्थ इति $K_1$; °शब्दार्थः $S_1$ 15 अत एव सच्छब्देन यत्र ] $A_1G_1$; अत एव ++त $K_1$; अत एव च सच्छब्देन यत्र $S_1$





र्थान्तरे वृत्त्यभावाद्विशेषणत्वानुपपत्तिरपि समानेत्याह—न चेति।

132

यदपि चात्रैव तद्वदभिधानपक्षे शङ्कितम्—मा भूदेकत्र वृत्तः सच्छब्दो ऽर्थान्तरविशेषणम्, तत्रैव तु तद्गतापरविशेषाकाङ्क्षायाम् अर्थान्तरेण विशेषणं भविष्यति। ततश्च "सन् घटः" इति समभिव्याहारोपपत्तिः। यथा नीलशब्देन नीलगुणविशिष्टे ऽभिहिते तद्गतविशेषाकाङ्क्षायां तस्य तरबाद्यर्थो विशेषणं भविष्यति नीलतर इति। तदिदमुक्तम्—

मा भूदर्थान्तरे वृत्तिर् यद्येकत्रासितादिवत्।
प्रकर्षादिविशेषत्वम्॥ इति।

एतच्चाशङ्क्य दूषितम्—

नैतज्जातेरजातितः। इति।

अस्ति खलु नीलिम्नः प्रकर्षेण संबन्ध इति स तस्य विशेषणं भवति।

9 मा भूद° … °विशेषत्वम् ] Pind's reconstruction is different. *Pramāṇasamuccaya* 5.10cd–11ab: नानिमित्तः स च मतो यद्येकत्रासितादिवत्॥ नैतदप्यस्त्युपेत्यापि नैतज्जातेरजातितः।
12 *Pramāṇasamuccaya* 5.11b.

1 °र्थान्तरे ] $A_1G_1S_1$; °र्थान्तरा $K_1$ 1 °द्विशेषण° ] $A_1G_1S_1$; °द्विशेण° $K_1$ 1 न चेति ] $A_1G_1S_1$; न च विशेषणम् $K_1$ 3 यदपि चात्रैव ] $K_1$; यदि चात्रैव $A_1G_1$; यदपि यत्रैव $S_1$ 3 वृत्तः ] $A_1G_1K_1$; वृत्तिः $S_1$ 4 ऽर्थान्तर° ] $A_1G_1K_1$; र्थान्तरे $S_1$ 4 तद्गतापर° ] $K_1$; तद्वतापर° $A_1G_1$; तद्गत° $S_1$ 5 ततश्च ] $A_1G_1K_1$; om. $S_1$ 6 नीलगुणविशिष्टे … °विशेषत्वम्॥ इति ] $A_1G_1$; विशिष्टत्वमिति $K_1$(eyeskip); नीलगुणविशिष्टे … °विशिष्टत्वमिति $S_1$ 6 तद्गत° ] $A_1G_1$; तद्वद° $S_1$ 7 भविष्यति ] $S_1$; भवति $A_1G_1$ 7 नीलतर इति ] $A_1G_1$; om. $S_1$ 9 °त्रासितादिवत् ] $A_1G_1$; °त्रचित्रादिवत् $S_1$ 10 °विशेषत्वम् ] $A_1G_1$; °विशिष्टत्वम् $K_1S_1$ 11 एतच्चाशङ्क्य ] $A_1G_1K_1$; एवं च शक्यं $S_1$ 11 दूषितम् ] $A_1G_1K_1$; दूषयितुं $S_1$ 12 नैतज्जा° ] $K_1S_1$; नैकजा° $A_1G_1$ 13 अस्ति खलु ] $A_1G_1K_1$; अस्तु तर्हि $S_1$

स एव हि तत्र प्रकृष्यते। सज्जातेस्तु न घटत्वादिकया जात्या कश्चिदस्ति संबन्ध इति। कथं सदर्थं विशिङ्क्ष्यादिति। तदिदमनुपपन्नम्। कः खल्वत्र विशेषः। यथा हि न जातौ जातिसमवाय इति न जातिर् जात्यन्तरस्य विशेषणम्। एवं गुणा अपि निर्गुणा इति काणादसिद्धान्ताद् गुणे प्रकर्षादिभिर्गुणस्य नीलिम्नो विशेषणत्वमनुपपन्नमेव।

अथ न प्रकर्षो नामार्थान्तरं तद्वतः। "प्रकृष्टः प्रकाशः सविता" इतिवत् प्रकर्षाभिधायिप्रपदप्रयोगः। न खलु सवितृप्रकाशादन्यः सवितृप्रकाशप्रकर्षो दृश्यते। तथापि तु तदभिधायिपदसमभिव्याहारो भवति। एवमिहापि नीलप्रकर्षयोरभेदाद्विशेषणत्वोपपत्तिरिति।

तन्न, एवमपि विशेषानभिधायिनो विशेषणत्वानुपपत्तेः। अस्त्येवातिशयो नामातिशयानेभ्यो भिन्नो धर्मभेदः, अन्यथा तरबादिविधेरानर्थक्यात्। आपेक्षिकस्त्वसौ परिमाणादिवत्। अत एव सवितर्यपि तस्य विशेषणत्वम्। अतो न कश्चिज्जातिगुणवाचिनां विशेषः।

---

**6** प्रकृष्टः प्रकाशः सविता ] Cf. *Brahmasiddhi* 5.6: यथा च "प्रकृष्टः प्रकाशः सविता" इति।; *Nyāyavārttikatātparyaṭīkā* ad 4.2.1 (606.13): न च प्रकृष्टः प्रकाशः सवितेत्यत्रपि प्रकर्षप्रकाशयोरभेदः।

---

**14** सज्जातेस्तु ] $S_1$; सजातेस्तु $A_1G_1$; तज्जातेस्तु $K_1$ **14** न ] $A_1G_1K_1$; न स॰ $S_1$ **3** न ] $A_1G_1K_1$; om. $S_1$ **4** ॰ताद् गुणे ] $A_1G_1$; ॰तात् गुणैः $K_1$; ॰तानुगुणैः $S_1$ **4** विशेषणत्वम॰ ] $A_1G_1K_1$; विशेषणम॰ $S_1$ **6** अथ न ] $A_1G_1K_1$; अथ $S_1$ **6** नामा॰ ] $A_1G_1K_1$; नाम ना॰ $S_1$ **6** प्रकृष्टः ] $S_1$; प्रकृष्ट॰ $A_1G_1K_1$ **7** ॰प्रपद॰ ] $A_1G_1^{ac}$; ॰पद॰ $G_1^{pc}S_1$; ॰ह्रिद॰ $K_1$ **8** सवितृप्रकाशप्रकर्षो ] $A_1G_1$; प्रकर्षो $K_1S_1$ **8** तु ] $A_1G_1S_1$; om. $K_1$ **8** ॰व्याहारो ] $A_1G_1S_1$; ॰व्याहा $K_1$ **9** ॰द्विशेषणत्वो॰ ] $A_1G_1K_1$; ॰दविशेषणो॰ $S_1$ **10** तन्न, एवमपि ] $A_1G_1K_1$; तच्च नैवं विशेषणम $S_1^{ac}$; तच्च नैवं म $S_1^{pc}$ **10** ॰षानभिधायिनो ] $A_1G_1$; ॰षाभिधायिनो $K_1S_1$ **11** भिन्नो ] $A_1G_1K_1$; भेदो $S_1$ **11** धर्मभेदः ] $A_1G_1S_1$; धर्मः $K_1$ **12** अन्यथा तरबादि॰ ] $A_1G_1S_1$; अन्यथा अन्यतरेयादि॰ $K_1$ **13** तस्य ] $A_1G_1S_1$; om. $K_1$





अपि चैतदप्यपोहवदभिधाने ऽपि समानमित्याह—नेति। यथैव हि सज्जातिरात्मन्यविद्यमानां घटादिजातिं न सूचयतीति न तया विशेष्यते, तथासदपोहेनापि नात्मन्यविद्यमानस्य विशेषरूपस्याघटाद्यपोहस्य सूचनं क्रियत इति तैरघटाद्यपोहैस्तस्यासदपोहस्य न विशेष्यत्वं नीलस्येव प्रकृष्टत्वेनेति।

133ab

यदपि चेदमपरं सच्छब्दानभिहितैर् घटत्वादिभिर्विशेष्यत्वमाशङ्क्य दूषितम् "अर्थाक्षेपो ऽप्यनेकान्तः" इति, तत्परेषामपि समानमित्याह—अर्थाक्षेप इति। यथैव हि सत्ता पटे ऽपि समवायान्न घटमाक्षिपति, एवमसदपोहो ऽपि नैकान्ततो ऽघटापोहमाक्षिपति, अन्यत्रापि वृत्तेः। "संदेहाल्लिङ्गलिङ्गिवत्" इति वैधर्म्यनिदर्शनम्। यथा लिङ्गाद् धूमादेर्लिङ्गिनो ऽर्थाक्षेपो नैवमिहेति।

133cd

अपि चायमसदपोहः सामान्यात्मनापि सिध्यन्नावश्यं विशेषापोह-

---

**8** *Pramāṇasamuccaya* 5.11c.

---

**1** ॰दप्यपोह॰ ] $A_1G_1K_1$; ॰दपोह॰ $S_1$ **1** ऽपि ] $A_1G_1S_1$; om. $K_1$ **1** नेति ] $A_1G_1S_1$; नात्मन्यविद्यमानत्वाद्विशेषापोहसूचनम् तस्मान्न तैर्विशेष्यत्वं प्रकृष्टत्वेन नीलवत् $K_1$ **2** हि ] $A_1G_1K_1$; om. $S_1$ **2** सज्जाति॰ ] $K_1S_1$; सजाति॰ $A_1G_1$ **2** ॰मानां ] $K_1S_1$; ॰मानानां $A_1G_1$ **2** सूचयतीति ] $A_1G_1K_1$; सूचयति $S_1$ **2** तया ] $A_1G_1K_1$; तद्वत्तया $S_1$ **4** ॰स्य विशेषरूपस्याघटाद्यपोहस्य ] $A_1G_1S_1$; ॰स्यापोहस्य $K_1$ **4** क्रियत ] $A_1G_1K_1$; न क्रियत $S_1$ **4** ॰पोहैस्त॰ ] $A_1G_1S_1$; ॰पोहस्त॰ $K_1$ **7** यदपि ] $A_1G_1K_1$; अपि $S_1$ **7** ॰नभिहितैर् ] $A_1G_1$; ॰नभिहितैरर्थाक्षिप्तैर् $K_1$; ॰नभिहितैः नेवार्थाक्षिप्तैर् $S_1$ **9** अर्थाक्षेप इति ] $A_1G_1S_1$; अर्थाक्षेपो पि नास्त्येव सन्देहाल्लिङ्गलिङ्गिवत् $K_1$ **9** पटे ] $A_1G_1$; घटे $K_1S_1$ **9** ऽपि ] $A_1G_1K_1$; पि हि $S_1$ **10** घट॰ ] $A_1G_1S_1$; पट॰ $K_1$ **10** ॰क्षिपति ] $A_1G_1S_1$; ॰क्षिपन्ति $K_1$ **10** नैकान्ततो ] $K_1S_1$; नैकान्तको $A_1G_1$ **11** ॰ति, अन्यत्रापि ] $A_1G_1K_1$; ॰त्यत्रापि $S_1$ **11** वृत्तेः ] $A_1G_1K_1$; वृत्ति॰ $S_1$ **12** नैवमिहेति ] $A_1G_1K_1$; न चैवमिहेति $S_1$ **14** चायमसदपोहः ] $A_1G_1K_1$; चायमपोहः $S_1$ **14** सामान्यात्मनापि ] $K_1S_1$; सामान्येनापि $A_1G_1$ **14** विशेषा॰ ] $K_1S_1$; विशेषणा॰ $A_1G_1$

माक्षिपतीत्याह—न सामान्यात्मनेति। असदपोहो ऽवस्तुरूपस्तुच्छः, नासौ विशेषापोहैर्विना न सिध्यति यत्तानाक्षिपेदिति भावः।

134

यथा चासदपोहो न विशेषापोहानाक्षिपति, एवमेव न स्वाधारमसाधारणं वस्त्वाक्षिपति, शशविषाणे ऽपि तदपोहस्य दर्शयितुं शक्यत्वादित्याह—एवमेवेति।

135ab

दूषणान्तरमाह—लिङ्गेति। अपोहो ह्यवस्तुरूपो लिङ्गसंख्यादिरहितः। तदस्य स्वरूपेण तावल्लिङ्गसंख्यादिसंबन्धो न विद्यत इति तद्वचनसमभिव्याहारानुपपत्तिरिति भावः।

135cd

जातिवादिनामिवाक्षिप्तव्यक्तिद्वारको भविष्यतीति चेत्। अत आह—व्यक्तेरिति। व्यपदेश्या हि नो जातितद्वतोरभेदाज्जात्यात्मना व्यक्तिरिति तद्द्वारको लिङ्गसंख्यासंबन्धः। भवतस्तु नासौ व्यपदेश्येति तद्द्वारेणापि लिङ्गसंबन्धो न विद्यत इति।

1 न सामान्यात्मनेति ] $A_1G_1$; न सामान्यात्मनापोहस्तैर्विना च न सिध्यति $K_1$; नेति $S_1$ 2 °हो ऽवस्तुरूपस्तुच्छः ] $K_1$; °ह्यो ह्यवस्तुरूपो ऽतो $A_1G_1$; °ह्यवस्तुरूपस्तुच्छो $S_1$ 2 विशेषा° ] $K_1S_1$; विशेषणा° $A_1G_1$ 2 यत्तानाक्षिपे° ] $A_1G_1K_1$; सत्तां नाक्षिपे° $S_1$ 4 एवमेव ] $A_1G_1K_1$; एवं $S_1$ 6 एवमेवेति ] $A_1G_1S_1$; एवमेव त्वनापेक्ष स्यादपोहेन वस्तुनः यतश्शब्दविषाणे पि तदभावस्य संभवः $K_1$ 8 °माह ] $A_1G_1S_1$; °मह $K_1$ 8 लिङ्गेति ] $A_1G_1S_1$; लिङ्गसंख्यादिसंबन्धो न चापोहस्य विद्यते $K_1$ 8 अपोहो ह्य° ] $A_1G_1K_1$; अपोह्य° $S_1$ 9 °संख्यादि° ] $A_1G_1$; °संख्यादिस् $K_1$; °संख्यादिसंख्यादि° $S_1$ 10 तद्वचन° ] $A_1G_1K_1$; वद्वचन° $S_1$ 10 °पपत्तिरिति ] $A_1G_1K_1$; °पपत्तेरिति $S_1$ 13 व्यक्तेरिति ] $A_1G_1S_1$; व्यक्तेरव्यपदेश्यत्वात्तद्वारेणापि नास्त्यसौ $K_1$ 14 नासौ ] $A_1G_1K_1$; नासौ रूप° $S_1$ 15 तद्द्वारेणापि ] $A_1G_1S_1$; न तद्द्वारेणापि $K_1$ 15 लिङ्ग° ] $A_1G_1$; लिङ्गसंख्या° $K_1$; संख्या° $S_1$ 15 न विद्यत ] $A_1G_1S_1$; विद्यत $K_1$





यदि तूच्यते—मा भूद् व्यक्तिर्व्यपदेश्या। अपोहद्वारेण तु गम्यमाना लिङ्गसंख्यादिभाजनं भविष्यतीति।

तन्न। अपोहेनापि हि सा गम्यमाना नासाधारणत्वेन रूपेण गम्यते, किं तु स्वरूपानुरूपेण व्यक्त्यन्तरसाधारणत्वेन। सामान्यात्मनेति यावत्। तच्च रूपमवस्त्वात्मकमेव। असाधारणं तु वस्तुरूपं लिङ्गसंख्यादिसंबन्धार्हं च। तच्च निर्विकल्पकप्रत्यक्षैकगोचरो न शाब्दज्ञानविषय इति।

136ab

गावौ गाव इत्यादिलिङ्गसंख्यासंबन्धानुपपत्तिरित्यभिप्रायेणाह—न हीति।

136cd

न चागम्यमानमेवासाधारणं वस्तु शाब्दज्ञाने विशेष्यत्वमनुभवतीत्याह—न वेति।

137ab

1 मा भूद् ] $A_1G_1K_1$; om. $S_1$ 1 व्यक्तिर्व्य° ] $K_1S_1$; व्यक्तिव्य° $A_1G_1$ 1 °देश्या। अपोह° ] $A_1G_1K_1$; °देशापोह° $S_1$ 1 °द्वारेण तु ] $A_1G_1K_1$; °द्वारे तु $S_1$ 2 भविष्यतीति ] $A_1G_1K_1$; भविष्यति $S_1$ 3 तन्न ] $A_1G_1K_1$; om. $S_1$ 3 हि ] $A_1G_1$; om. $K_1S_1$ 4 गम्यते ] $A_1G_1^{pc}K_1S_1$; गम्यतेति $G_1^{ac}$ 4 व्यक्त्यन्तरसाधारणत्वेन ] $K_1$; व्यक्त्यन्तरासाधारणत्वेन $A_1G_1$; व्यक्त्यन्तरसाधारणेन $S_1$ 6 लिङ्ग° ] $K_1S_1$; लिंगं $A_1G_1$ 6 °संख्यादि° ] $A_1G_1$; °संख्या° $K_1S_1$ 6 °संबन्धार्हं च ] $A_1G_1$; °संबन्धरहितं $K_1$; °संबन्धार्हम् $S_1$ 6 निर्विकल्पकप्रत्यक्षैक° ] $A_1G_1$; निर्विकल्पकैकप्रत्यक्ष° $K_1S_1$ 7 शाब्द° ] $S_1$; शब्द° $A_1G_1K_1$ 9 गावौ गाव ] $K_1S_1$; गावौ न गाव $A_1G_1$ 9 इत्यादि° ] $A_1G_1K_1$; °इति $S_1$ 9 °पपत्तिरि° ] $A_1G_1K_1$; °पपत्तेरि° $S_1$ 10 न हीति ] $A_1G_1S_1$; न ह्यसाधारणत्वेन सापोहेनापि गम्यते $K_1$ 12 चागम्यमानमेवा° ] $G_1K_1S_1$; चागम्यमेवा° $A_1$ 12 शाब्दज्ञाने ] $A_1G_1S_1$; शब्दज्ञाने $K_1$ 12 विशेष्यत्वम° ] $A_1G_1K_1$; विशेषार्धम° $S_1$ 13 न वेति ] $A_1G_1$; न चाप्यगम्यमानस्य वस्तुन स्याद्विशेष्यता $K_1$; न चेति $S_1$

अपि चापोहवादिनां लिङ्गादयो ऽप्यपोहात्मनावस्तुरूपा एवेति न वस्तूपकर्तुं शक्नुवन्ति, वस्तुनो ऽपि तदुपकृतस्यावस्तुत्वापातात्। तस्मादपि लिङ्गसंख्यादिसंबन्धानुपपत्तिरित्यभिप्रायेणाह—लिङ्गेति।

137cd

न चानपेक्षितार्था एव लिङ्गादिशब्दा वस्तूपकुर्वन्ति, अर्थनिबन्धनत्वाच्छब्दसंबन्धस्येत्याह—वस्तुन इति।

138

किं चायमपोहो नामाभावः। स च सर्वप्रतिषेधानामनुपलब्धिगम्यत्वाद् अभावप्रमेयो युक्तः। न च गोत्वादयो ऽभावेन प्रमीयन्ते, प्रत्यक्षादिवेद्यत्वात्। अतो नापोहरूपा गोत्वादय इत्याह—नेति।

139ab

एवं तावन्न नाम्नामपोहो वाच्य इत्युक्तम्। आख्यातशब्देभ्यो ऽपि नान्यनिवृत्तिरवगम्यत इत्याह—आख्यातेष्विति।

139cd

गोपर्युदासश्चागौः। तन्निवृत्त्या शक्येतापि गौः प्रत्येतुम्। न चाख्यातेषु किंचित्पर्युदासरूपं निषेध्यं गम्यते। न ह्यपचति न भवतीति पचतीति शक्यं निरूपयितुम्, अपचत्यर्थस्यानवगमाद् अवाचकादप्रतीतेरित्यभिप्रायेणाह—नेति। आख्यातयोगी हि नञ् निषेधवचनः, न पर्युदासार्थ इति भावः।

140ab

यदि त्वसमस्तस्यैव न पचतीति नञा योगं कृत्वा तत्पुनर् नञा प्रतिषिध्यते न न पचतीति, ततो नञर्थस्य निषेधस्यैव निषेधो ऽवगम्यते, नापचत्यपोह्यस्य, तस्य कथंचिदप्रतिभासात्। तथा ह्यपचतीति तावद्वक्तुमशक्यम्। न पचतीत्युच्यमाने पाकप्रतिषेध एव बुद्धौ भवति। न तु गोपर्युदास इवागोशब्दात् पचतिपर्युदास इत्याह—न नेति। निषेधनिषेधनं प्रतीयत इत्यर्थः।

140cd

पचतीत्यनिषिद्धं केनापि स्वरूपेण विधिरूपेणावतिष्ठत इत्याह—पचतीति।

141

---

**1 °वादिनां** ] $A_1G_1K_1$; °वादिनो $S_1$　**1 °त्मना°** ] $A_1G_1$; °त्मका अ° $K_1$; °त्मकात्र $S_1$　**1 न** ] $A_1G_1K_1$; न स्वरूपेण $S_1$　**2 वस्तूपकर्तुं** ] $A_1G_1S_1$; वस्तूपस्कर्त्तुं $K_1$　**3 लिङ्गसंख्यादि°** ] $A_1G_1$; लिंगादि° $K_1S_1$　**3 °रित्यभिप्रायेणाह** ] $A_1G_1K_1$; °रित्याह $S_1$　**3 लिङ्गेति** ] $A_1G_1S_1$; लिङ्गसंख्याद्यपोहानान्नोपकार स्वरूपतः $K_1$　**5 °शब्दा** ] $A_1G_1K_1$; om. $S_1$　**5 °पकुर्वन्ति** ] $A_1G_1S_1$; °पस्कुर्वन्ति $K_1$　**6 अर्थनिबन्धनत्वा°** ] $A_1G_1K_1$; अर्थवचनत्वा° $S_1$　**6 वस्तुन इति** ] $S_1$; वस्तुनश्चोपकार्यत्वं कथं शब्दैः प्रतीयते $K_1$; वस्तुनश्चेति वस्तुन इति $A_1G_1$　**8 नामाभावः** ] $A_1G_1K_1$; नाभावः $S_1$　**8 स च** ] $A_1G_1K_1$; om. $S_1$　**10 प्रत्यक्षादि°** ] $A_1G_1K_1$; प्रत्यक्ष° $S_1$　**10 इत्याह—नेति** ] $A_1G_1$; इत्युपसंहरति न विनानुपलब्ध्या च स्यादभावगतिः क्वचित् न चाभावप्रमेयत्वम् गोत्वादेरिह गम्यते $K_1$; इत्याह न विनेति $S_1$　**12 तावन्न** ] $A_1G_1K_1$; तावत् ननु $S_1$　**12 °पोहो वाच्य** ] $A_1G_1S_1$; °पोह $K_1$　**13 नान्य°** ] $A_1G_1K_1$; नाना° $S_1$　**13 आख्यातेष्विति** ] $A_1G_1S_1$; आख्यातेषु च नान्यस्य निवृत्तिस्संप्रतीयते $K_1$　**15 शक्येतापि** ] $A_1G_1S_1$; शंक्येतापि $K_1$





**1 न चाख्यातेषु** ] $A_1G_1$; आख्यातेषु $K_1$; आख्यातेषु च न $S_1$　**1 ह्यपचति** ] $A_1G_1K_1$; ह्यपचतिर् $S_1$　**1 भवतीति** ] $A_1G_1S_1$; भवति $K_1$　**2 शक्यं** ] $A_1G_1K_1$; शक्यते $S_1$　**2 °नवगमाद्** ] $A_1G_1K_1$; °नवगम्यता $S_1$　**3 नेति** ] $A_1G_1S_1$; न पर्युदासरूपं हि निषेध्यन्तत्र विद्यते $K_1$　**3 हि** ] $A_1G_1$; om. $K_1S_1$　**6 त्वसमस्तस्यैव** ] $A_1G_1K_1$; त्वसमस्यैव $S_1$　**6 नञा योगं** ] $A_1G_1$; नञ्योगं $K_1$; नञ्प्रयोगं $S_1$　**7 न न** ] $A_1G_1K_1$; न $S_1$　**8 नञर्थस्य निषेधस्यैव निषेधो ऽवगम्यते** ] $A_1G_1$; नञर्थस्यैव निषेधस्य निषेधो वगम्यते $K_1$; नञर्थस्यैव प्रतिषेधस्य $S_1$　**8 नापचत्य°** ] $A_1G_1$; नपचत्य° $K_1S_1$　**8 °भासात्** ] $A_1G_1S_1$; °भासा $K_1$　**10 एव** ] $A_1G_1K_1$; om. $S_1$　**10 बुद्धौ** ] $K_1S_1$; बुद्धो $A_1G_1$　**10 इवा°** ] $A_1G_1K_1$; एवा° $S_1$　**11 न नेति** ] $A_1G_1S_1$; न नेति ह्युच्यमाने पि निषेधस्य निषेधनम् $K_1$　**11 निषेधनिषेदनं प्रतीयत इ°** ] $A_1G_1$; भविष्यती° $K_1$; निषेधनं प्रतीयत इ° $S_1$　**13 °रूपेणाव°** ] $A_1G_1S_1$; °रूपेण वाव° $K_1$　**14 पचतीति** ] $A_1G_1S_1$; पचतीत्यनिषिद्धन्तु स्वरूपेणावतिष्ठते $K_1$

यश्चायमाख्यातेभ्यः साध्यार्थप्रत्ययो ऽतीतानागतादिप्रत्ययश्चापाक्षीत्पक्ष्यतीत्यादिभ्यः, सो ऽपि निष्पन्नरूपापोहवचनत्वे ऽनुपपन्नम्। सर्वदा हि सिद्धरूपः प्रत्युत्पन्न एवापोहो ऽवगन्तुमुचित इत्याह—साध्यार्थेति।

142ab

यश्चायं विध्यनुवादोद्देश्योपादेयविभक्तिवाच्यषड्विधकारकचक्राद्यर्थराशिर् अपरिनिष्पन्नरूपः, अत्राप्यपोह्यानिरूपणादपोहो दुर्निरूप इत्याह—विध्यादाविति।

142cd

यच्चेदमनर्थबीजं नञव्ययम्, अस्यापि प्रतिषेध्यानिरूपणाद्दुरधिगममपोहार्थत्वम्। न हि ज्ञायते नञो नञ्योगे कीदृशो ऽपोहो भवतीत्याह—नञ इति।

143ab

ये चामी चादयो निपाताः समुच्चयादिवचनाः, तेषामपि नञ्यु-

---

4 साध्यार्थेति ] Both readings, i.e., साध्यत्व° and साध्यार्थ°, are attested in *Ślokavārttika* manuscripts.

---

1 साध्यार्थ° ] $A_1G_1K_1$; संख्या° $S_1$ 1 °प्रत्यय° ] $A_1G_1K_1$; °प्रत्यया° $S_1$ 2 °श्चापाक्षीत्पक्ष्यती° ] $A_1G_1K_1S_1^{pc}$; °श्च पक्ष्यत्पक्ष्यती° $S_1^{ac}$ 2 °त्यादिभ्यः ] $A_1G_1S_1$; °त्यादिः $K_1$ 3 °पपन्नम् ] $A_1G_1$; °पपन्न $K_1$; °पपन्नः $S_1$ 3 सर्वदा ] $A_1G_1S_1$; सदा $K_1$ 3 सिद्ध° ] $A_1G_1S_1$; सिद्धि° $K_1$ 3 °रूपः ] $K_1S_1$; °रूपं $A_1G_1$ 3 प्रत्युत्पन्न ] $A_1G_1S_1$; प्रत्युत्पन्नरूप $K_1$ 4 साध्यार्थेति ] $A_1G_1$; साध्यत्वम् प्रत्ययश्चात्र तथा भूतादिरूपणम् निष्पन्नत्वादपोहस्य निर्निमित्तं प्रसज्यते $K_1$; साध्यत्वेति $S_1$ 6 यश्चायं ] $A_1K_1$; क्रियश्चायं $G_1$; यश्चा° $S_1$ 6 °षड्विध° ] $A_1G_1S_1$; °षड्विधा $K_1$ 6 °चक्राद्य° ] $A_1G_1K_1$; °चक्रादिर° $S_1$ 7 °रूपः ] $A_1G_1K_1^{pc}$; °त्वादयोरूपः $K_1^{ac}$; °रूपो प्य् $S_1$ 8 विध्यादाविति ] $A_1G_1S_1$; विद्यादावर्थराशौ च नान्यापोहनिदर्शनम् $K_1$ 10 नञव्ययम् ] $A_1G_1K_1$; न कर्तव्यम् $S_1$ 11 न हि ] $A_1G_1S_1$; न हि न $K_1$ 12 नञ इति ] $A_1G_1S_1$; नञश्चापि नञा युक्तादपोहः कीदृशो भवेत् $K_1$ 14 चामी ] $A_1G_1S_1$; om. $K_1$ 14 समुच्चयादि° ] $A_1G_1S_1$; समुच्चय° $K_1$





क्तापोह्यानिरूपणादेव नान्यापोहार्थत्वम्। अन्यनिषेधेन तु चप्रत्यये चशब्दापोह एवावसीयते, नार्थापोहः। यत्र तु पदान्तरसमभिव्याहृतानां समुच्चयवचनत्वम्, तत्र नञ्योगाभावान्नान्यापोहनमवगम्यत इत्याह—चादीनामिति। आदिशब्देनोपसर्गाणामुपादानमिति।

143cd

एवं तावच्चतुर्विधस्य पदात्मनः शब्दस्यापोहो नार्थ इत्युक्तम्। वाक्यात्मनो ऽप्यपोह्याभावादेव नान्यनिवृत्तिरर्थः। अपरिनिष्पन्नो हि पूर्वापरीभूतो वाक्यार्थो न नञा पदार्थवत् पर्युदसितुं शक्यः। यदेव हि पदं वाक्ये नञा संयुज्यते, तस्यैवार्थं पर्युदस्यति, न वाक्यार्थमिति नापोहरूपो वाक्यार्थः सिध्यतीत्यभिप्रायेणाह—वाक्यार्थ इति।

144ab

अन्यापोहवादिनामनन्यापोहशब्दस्य न किंचिद्वाच्यमुपलभ्यते। अन्यापोहप्रतिषेधो ह्यतो ऽवगम्यते। सर्वशब्दानां चान्यापोहार्थत्वे तस्याप्यन्यापोह एवार्थो भवेदित्यभिप्रायेणाह—अनन्येति।

---

1 °पोह्या° ] $A_1G_1K_1$; °पोह्यादि° $S_1$ 1 नान्यापोहा° ] $A_1G_1$; नान्योपोहा° $K_1$; नापोहा° $S_1$ 1 अन्यनिषेधेन ] $A_1G_1S_1$; अचनिषेधेन $K_1$ 1 तु चप्रत्यये ] $A_1G_1K_1$; तु चप्रयोगे $S_1$ 2 चशब्दापोह ] $A_1G_1K_1$; शब्दापोह $S_1$ 2 यत्र ] $A_1G_1K_1$; अन्यत्र $S_1$ 3 समुच्चय° ] $A_1G_1$; समुच्चयादि° $K_1S_1$ 3 नञ्योगा° ] $A_1G_1K_1$; नञप्रयोगा° $S_1$ 3 °पोहनम° ] $A_1G_1S_1$; °पोहा° $K_1$ 4 चादीनामिति ] $A_1G_1S_1$; चादीनामपि नञ्योगो नैवास्तीत्यनपोहनम् $K_1$ 6 °तुर्विधस्य ] $A_1G_1$; °स्तुवच्चतुर्विधस्य $K_1$; °तुर्विधस्यापि $S_1$ 7 वाक्यात्मनो ऽप्य° ] $A_1G_1K_1$; वाह्यात्मनो पि ह्य° $S_1$ 7 नान्यनिवृत्तिर° ] $A_1G_1K_1$; न परिवृत्तिरित्य° $S_1$ 8 वाक्यार्थो ] $A_1G_1K_1$; वाह्यार्थो $S_1$ 8 न नञा ] $A_1G_1K_1$; नञा $K_1$ 8 पदार्थवत् ] $A_1G_1K_1$; om. $S_1^{ac}$; पदार्थ $S_1^{pc}$ 8 शक्यः ] $A_1G_1S_1$; शक्याः $K_1$ 9 संयुज्यते ] $A_1G_1K_1$; प्रयुज्यते $S_1$ 10 वाक्यार्थ इति ] $A_1G_1S_1$; वाक्यार्थे न्यनिवृत्तिश्च व्यपदेष्टुन्न शक्यते $K_1$ 12 °वादिनाम° ] $A_1G_1$; °वादिनामेवा° $K_1$; °वादिनां चा° $S_1$ 12 °शब्दस्य ] $A_1G_1K_1$; °शब्दादौ $S_1$ 14 तस्या° ] $A_1G_1K_1$; ऽस्या° $S_1$ 14 °प्यन्यापोह ] $A_1G_1S_1$; °प्यन्यापोहार्थ $K_1$ 14 अनन्येति ] $A_1G_1$; अनन्यापोहशब्दादौ वाच्यन्न च निरूप्यते $K_1$; अन्येति $S_1$

144cd

ये चामी प्रमेयज्ञेयादयः शब्दाः, तेषामप्यज्ञेयाद्यपोह्यासंभवान्नापोहो ऽर्थ इत्याह — प्रमेयेति।

145ab

ननु कल्पितापोह्यस्य व्युदासेनैवमादीनां बौद्धैरर्थवर्णना कृता, यदाहुः —

अज्ञेयं कल्पितं कृत्वा ज्ञेयशब्दो ऽभिवर्तते। इति।

अतः कथमपोह्याभावः। अत आह — अपोह्येति। अयमभिप्रायः। महानयं क्लेशो यत्कल्पितापोह्यनिषेधेनाप्रतीयमानः शब्दार्थो वर्णनीयः। वरं हि यथाप्रतीति वस्त्वाकारमेव सामान्यं काल्पनिकमाश्रीयताम्, किमपोहव्यसनेनेति।

145cd

न च वाच्यम् — अस्तु तर्हि कल्पनामात्रनिमित्तं सामान्यमिति। एवं हि ज्ञानाकार एव शब्दानामर्थो भवेत्, निषिद्धश्चासौ बाह्यार्थसिद्धावित्याह — ज्ञानेति।

146a

7 Quoted from Dignāga's lost *Hetumukha*. Cf. Pind 2015: II 161, n. 539. Also quoted in *Tattvasaṅgrahapañjikā* 385.11–12.

2 शब्दाः ] $A_1G_1S_1$; शब्दा $K_1$ 3 °पोहो ऽर्थ ] $K_1S_1$; °पोहार्थ $A_1G_1$ 3 प्रमेयेति ] $A_1G_1S_1$; प्रमेयज्ञेयशब्दादेरपोह्यं कुत एव तु $K_1$ 5 °पोह्यस्य ] $A_1G_1$; °पोह° $K_1$; °पोह्य° $S_1$ 6 यदाहुः ] $A_1G_1S_1$; यथाहुः $K_1$ 7 अज्ञेयं ] $G_1K_1S_1$; अजेयं $A_1$ 7 ऽभिवर्त° ] $A_1G_1K_1$; हि वर्त° $S_1$ 8 अपोह्येति ] $A_1G_1S_1$; अपोहकल्पनायां वो वरं वस्त्वेव कल्पितम् $K_1$ 9 °मानः शब्दार्थो ] $A_1G_1$; °मान एव शब्दार्थो $K_1$; °मान एवार्थो $S_1$ 13 °निमित्तं ] $A_1G_1S_1$; °कल्पितम् $K_1$ 13 सामान्यमिति ] $A_1G_1K_1$; सामान्यं $S_1$ 14 एवं हि ] $A_1G_1S_1$; एवं $K_1$ 14 ज्ञानाकार ] $A_1G_1S_1$; ज्ञानाकारा $K_1$ 14 भवेत्, निषिद्ध° ] $A_1G_1^{pc}K_1S_1$; भवेद्ध° $G_1^{ac}$ 15 °र्थसिद्धावित्याह ] $A_1G_1K_1$; °र्थ इत्याह $S_1$ 15 ज्ञानेति ] $A_1G_1S_1$; ज्ञानाकारनिषेधाच्य नान्तरार्थाभिधेयता $K_1$





आन्तरार्थाभिधाने तु नापोह्यापोहव्यवहारो ऽस्तीत्युक्तमेव प्राक्। न ह्यत्र बुद्ध्यन्तरस्यापोह्यता प्रतीयते, येन तद्व्युदासेन बुद्ध्यन्तरमुच्येतेत्यभिप्रायेणाह — न चेति।

146ab

अतः सिद्धं न ज्ञेयादिशब्दानां कल्पितापोह्यद्वारेणापोहो वाच्य इति। उपसंहरति — तस्मादिति।

146cd

ये चामी सर्वगोचरा एवमादयः शब्दाः, एषामनेवमपोह्याभावादेव नापोहो वाच्यः। न ह्यनेवं नाम किंचिदस्त्यनिदमिति वा, संनिधानोपाधिना सर्वस्य तथात्वात् संनिहितमात्रप्रकारवचनत्वादनयोः। अतो य एव यदा यत्प्रकारः संनिधीयते, स एवैवमादिना शब्देनोपात्त इत्यनेवमात्मनो ऽपोह्यस्याभावाद् एवमादीनां नापोहो वाच्य इत्याह — एवमिति।

147ab

अत्र भिक्षुणा भेदशब्दानां पलाशशिंशपादीनामन्योन्यापोहसिद्ध्यर्थमुक्तम् —

1 प्राक् ] *Ślokavārttika apoha* 36cd–41.

1 आन्तरार्थाभिधाने तु ] $A_1G_1$; आन्तराभिधाने तु $K_1$; आन्तराव्यवधाने पि च $S_1$ 1 नापोह्यापोह° ] $A_1G_1S_1$; नापोहापोह° $K_1$ 1 ऽस्ती° ] $A_1G_1S_1$; नास्ती° $K_1$ 3 °मुच्येतेत्य° ] $A_1G_1S_1$; °मुच्यतेत्य° $K_1$ 3 न चेति ] $A_1G_1S_1$; न चाप्यपोह्यता $K_1$ 5 °पोह्य° ] $A_1G_1K_1$; °पोह्यविरोधि° $S_1$ 6 तस्मादिति ] $A_1G_1S_1$; तस्मान्नापोहस्तेषु सिध्यति $K_1$ 8 एवमादयः ] $A_1G_1K_1$; एवमित्यादयः $S_1$ 8 एषामनेवमपोह्या° ] $A_1G_1$; तेषामप्यपोह्या° $K_1$; एषामपोह्या° $S_1$ 9 नाम ] $A_1G_1S_1$; नात्म $K_1$ 9 °दस्त्य° ] $K_1S_1$; °दस्त्व° $A_1G_1$ 9 °निदमिति वा ] $A_1G_1K_1$; °न्यत् $S_1$ 10 तथात्वात् ] $A_1G_1$; तत्वात् $K_1$; तथार्थत्वाद° $S_1$ 11 यत्प्रकारः ] $A_1G_1K_1$; प्रकारः $S_1$ 11 एवैवमादिना ] $A_1G_1K_1$; एवमादिना $S_1$ 12 °नोपात्त ] $A_1G_1K_1$; °नोच्यत $S_1$ 12 °भावाद् ] $A_1G_1^{pc}S_1$; °भावादत् $G_1^{ac}$ 13 एवमिति ] $A_1G_1S_1$; एवमित्यादिशब्दानान्न चापोह्यन्निरूप्यते $K_1$

भेदो भेदान्तरार्थं तु विरोधित्वादपोहते। इति।

अस्यार्थः। यो ऽयं वृक्षत्वस्य भेदशब्दः पलाशादिः, अयं शिंशपादिभेदान्तरार्थं शब्दमपोहते, विरोधित्वात्। अस्ति हि भेदशब्दानामेकवृक्षत्वोपनिपातित्वात् परस्परविरोधः। पलाशादिशब्दो हि स्वगोचरे वृक्षत्वसामान्यमपहरति, एवं शिंशपादिशब्दो ऽपीति समानविषयोपनिपाताद्विरोधः। ततश्चापोहत इति। तदिदमनुभाषते तावत्—विरोधित्वेनेति।

147cd

अनुभाषिते दूषणमाह—विरोध इति। अस्यार्थः। विरोधनिबन्धनमपोहं ब्रुवाणस्येतरेतराश्रयम्, अपोहात्प्राग् विरोधासिद्धेः। अन्योन्यापोहेन हि वर्तमानेषु पलाशादिशब्देषु विरोधावगमः। विरोधादेव त्वपोह इष्यमाणे ऽपरिहरणीयमितरेतराश्रयमिति।

148ab

यः पुनरेकसामान्यापहारनिबन्धनो विरोध उक्तः, सो ऽयुक्तः, तत्र भेदेषु त्वन्मते विधिरूपेण सामान्यापहाराभावात्। न खलु शिंशपा विधिरूपेण वृक्षत्वमपहरत्यात्मसात्करोति, पलाशत्वं चापहरति प्रतिक्षिपति। एवं सति यद् येन सहैकत्र भवति, न तेन विरुध्यते। येन सहैकत्र न भवति, तेन विरुध्यते, सहासंभवलक्षणत्वाद्विरोधस्य। न चैवमस्ति। अतो ऽसति विरोधे न विघ्नः केन विशेषेण वृक्षत्वमाक्षिपति, पलाशत्वं च प्रतिक्षिपतीति। वाचकभेदस्तु भेदसामान्ययोरविशिष्ट इति नानेन व्यवस्थितावाक्षेपप्रतिक्षेपौ सिध्यत इत्यभिप्रायेणाह—नेति।

148cd

अभिप्रायं विवृणोति—पलाशादीनिति। यतो न विधिरूपेण सामान्यापहारः, अतो यदि शब्दभेदमात्रात्पलाशादीनपोहते, एवं सति न तानपोह्यावतिष्ठते, तद्वदेव वृक्षमपि हरेत्। निराकरणे हरतिः "दुरितं हरन्ति" इतिवत्।

व्याख्यानान्तरम्। यदि न विधिरूपेणापहारित्वम्, कथं नाम

1 *Pramāṇasamuccaya* 5.28ab.

1 भेदान्तरा॰ ] $A_1G_1S_1$; भेदाभेदान्तरा॰ $K_1$　2 यो ऽयं ] $A_1G_1S_1$; om. $K_1$　3 ॰पोहते ] $A_1G_1S_1$; ॰पोहेत $K_1$　4 ॰पातित्वात् ] $A_1G_1$; ॰पातिना $K_1$; ॰पातिनां $S_1$　4 परस्पर॰ ] $A_1G_1K_1$; परस्परं $S_1$　4 पलाशादिशब्दो ] $A_1G_1$; न पलाशादिशब्दो $K_1$; पलाशशब्दे $S_1$　5 वृक्षत्वसामान्यम॰ ] $A_1G_1S_1$; वृक्षत्वम॰ $K_1$　5 शिंशपादि॰ ] $A_1G_1K_1$; शिंशपा॰ $S_1$　6 ॰योपनिपाता॰ ] $A_1G_1K_1^{pc}$; ॰योपनिपतना॰ $K_1^{ac}$; ॰यत्वोपपाता॰ $S_1$　6 ततश्चापोहत ] $A_1G_1K_1$; अतश्चापोह $S_1$　6 तदिदम॰ ] $A_1G_1S_1$; तद॰ $K_1$　7 विरोधित्वेनेति ] $A_1G_1S_1$; विरोधित्वेन भेदानामपोहो यदि कल्प्यते $K_1$　9 विरोध इति ] $A_1G_1S_1$; विरोधो पोहतस्तत्र विरोधाच्चाप्यपोहनम् $K_1$　11 अन्योन्यापोहेन ] $A_1G_1S_1$; अन्योपोहेन $K_1$　11 वर्तमानेषु ] $A_1G_1K_1$; वर्ण्यमानेषु $S_1$　12 इष्यमाणे ] $A_1G_1S_1$; इष्यमाणो $K_1$　12 ऽपरिहरणीय॰ ] $A_1G_1K_1$; ऽपरिहार्य॰ $S_1$　14 यः ] $A_1G_1S_1$; यत् $K_1$　14 पुनरेक॰ ] $A_1G_1$; पुनरनैका॰ $K_1$; पुनरयमेक॰ $S_1$　15 ॰न्यापहाराभावात् ] $A_1G_1K_1$; ॰न्यापहारात् $S_1$





1 शिंशपा ] $A_1G_1K_1$; शिंशपया $S_1$　1 वृक्षत्वमपहरत्यात्मसात्करोति ] $A_1G_1S_1$; वृक्षत्वमपहरति $K_1$　1 चापहरति ] $A_1G_1$; च $K_1$; च हरति $S_1$　2 प्रतिक्षिपति ] $A_1G_1K_1$; प्रतिक्षिपतीति $S_1$　2 एवं सति ] $A_1G_1S_1$; एवञ्च सति $K_1$　2 यद् ] $A_1G_1$; om. $K_1$; हि $S_1$　2 न तेन ] $A_1G_1K_1$; तेन $S_1$　3 येन ] $A_1G_1S_1$; यद्येन $K_1$　3 तेन ] $A_1G_1$; तत् तेन $K_1$; न तेन $S_1$　4 ॰णत्वाद्विरोधस्य ] $A_1G_1S_1$; ॰णस्याद्विरोधस्य $K_1$　4 न चैवमस्ति। अतो ऽसति विरोधे ] $A_1G_1K_1$; न चैवमस्तीति $S_1$　5 प्रतिक्षिपतीति ] $K_1S_1$; प्रतिक्षिपन्तीति $A_1G_1$　6 ॰स्थितावा॰ ] $A_1G_1K_1$; ॰स्थिता॰ $S_1$　6 ॰प्रतिक्षेपौ ] $A_1G_1$; ॰प्रतिक्षेपो $K_1$; ॰प्रतिक्षेपो न $S_1$　7 सिध्यत इत्य॰ ] $A_1G_1K_1$; सिध्यतीत्य॰ $S_1$　7 नेति ] $A_1G_1S_1$; न सामान्यापहारित्वम् विधिरूपेण तत्र ते $K_1$　9 पलाशादीनिति ] $A_1G_1S_1$; पलाशादीन+++++हरति शिंशपा $K_1$　10 एवं सति ] $A_1G_1S_1$; एवं सति एवं सति $K_1$　11 ॰पोह्याव॰ ] $A_1G_1K_1$; ॰पोह्यानव॰ $S_1$　11 तद्वदेव ] $A_1G_1K_1$; तद्वद्यदेव तु $S_1$　11 वृक्षमपि ] $A_1G_1K_1$; वृक्षत्वमपि $S_1$　11 निराकरणे हरतिः ] $G_1$; निराकरणे हरति $A_1$; निराकणे हरति $K_1$; निराकरतिर् $S_1$　12 "दुरितं हरन्ति" इतिवत् ] $A_1G_1$; दुरितं हरतीतिवत् $K_1$; दुरितमितिवत् $S_1$　13 व्याख्यानान्तरम् ··· शब्दभेदाविशेषात् ] $A_1G_1$; व्याख्यानान्तरम् ··· शब्दाविशेषात् ] $K_1$; om. $S_1$

तर्ह्यपहरति। अत आह—पलाशादीनिति। न त्वन्मते विधिरूपेण सामान्यापहारः “शिंशपायं वृक्षः” इति। किं तर्ह्यशिंशपारूपान् पलाशादीनपोह्य पश्चादतः पलाशादेर्वृक्षत्वसामान्यमपहरति, आत्मसात्करोति शिंशपा “नायमशिंशपा वृक्षः” इति। तेनापोहपूर्वकसामान्यापहाराद्विरोधः, विरोधाच्चापोह इति स्थितमितरेतराश्रयम्।

149ab

यदि तु सत्येव विरोधे शब्दभेदमात्रात् पलाशादीनपोहते, एवं सति न तानपोह्यावतिष्ठेत। तद्वदेव तु वृक्षत्वमप्यपोहेत, शब्दभेदाविशेषात्। एवं च “वृक्षः शिंशपा” इत्यपि सामानाधिकरण्यं नोपपद्येत “पलाशः शिंशपा” इतिवदिति भावः। एवं च यदुक्तम्—

अन्यत्वे ऽपि न सामान्यभेदपर्यायवाचिनाम्।
अविरोधाद् भवेत्त्यागो भेदानामिव भेदतः॥ इति।

तदपि निराकृतमित्याह—सामान्यादिति। अयं किलात्र परेषा-

12 Pind’s reconstruction is different. *Pramāṇasamuccaya* 5.25cd: अन्यत्वे ऽपि न सामान्यभेदपर्यायवाच्यनुत्॥

1 °त्वम्, कथं नाम त° ] $A_1G_1$; ++++++ $K_1$ 2 °शिंशपारूपान् ] $A_1G_1$; °शिंशपादिरूपात् $K_1$ 3 पश्चादतः ] $A_1G_1$; पश्चात् $K_1$ 5 °पोहपूर्वकसा° ] $A_1G_1$; ++++++ $K_1$ 8 तु सत्येव ] $A_1G_1$; त्वसत्येव $K_1$ 8 शब्दभेदमात्रात् ] $A_1G_1$; शब्दमात्रभेदात् $K_1$ 9 तान° ] $A_1G_1$; तानतो $K_1$ 9 °तिष्ठेत ] $A_1G_1$; °तिष्ठते $K_1$ 9 वृक्षत्व° ] $A_1G_1$; वृक्ष° $K_1$ 9 °पोहेत ] $A_1G_1$; °पोह्येत $K_1$ 10 शब्दभेदाविशेषात् ] $A_1G_1$; शब्दाविशेषात् $K_1$ 10 एवं च “वृक्षः शिंशपा” इत्यपि ] $A_1G_1S_1$; ++++शपेत्यपि $K_1$ 10 नोपपद्येत ] $A_1G_1K_1$; नोपपद्यते $S_1$ 12 °भेद° ] $A_1G_1K_1$; °भेदः $S_1$ 12 °वाचिनाम् ] $A_1G_1K_1$; °वाच्ये $S_1$ 13 भवेत्त्यागो ] $A_1$; भवेत्यागो $G_1$; भवेच्छब्दो $K_1S_1$ 13 भेदानामिव ] $A_1G_1K_1$; भेदान्यमिव $S_1$ 13 भेदतः ] $A_1G_1$; भेदवद् $K_1$; भेदनुद् $S_1$ 14 सामान्यादिति ] $A_1G_1$; सामान्याद्यनपोहश्च+++++कल्प्यते $K_1$; सामान्येति $S_1$ 14 अयं ] $A_1G_1K_1$; एवं $S_1$





मभिप्रायः। भेदशब्दः सामान्यार्थं सामान्यशब्दो भेदार्थं पर्यायः पर्यायान्तरं भेदशब्द इव भेदान्तरार्थं नापोहते, तेषामविरोधादिति तदिदमविरोधस्यैवानन्तरोक्तेन प्रकारेण दुरधिगमत्वान्न कल्पत इति।

149cd

कथं न कल्पते। अत आह—न हीति। असति हि विधिरूपेण सामान्यापहारे किं केन विरुध्यत इति न ज्ञायते। शब्दस्वरूपाणामर्थनिरपेक्षाणां विरोधाविरोधयोरवगन्तुमशक्यत्वादिति भावः।

150ab

वस्तुनिबन्धनश्च विरोधो वस्तुसंस्पर्शाभावादेव परमते न शब्दानां संभवतीत्याह—न चेति।

150cd

स्यादेतत्। अपोहानामेव शब्दगोचराणां विरोधाविरोधौ भविष्यत इति। तन्न, शब्दव्यापारात्प्राक् तेषामनवगम्यमानानां विरोधाविरोधयोरवगन्तुमशक्यत्वादित्याह—प्रागिति।

